॥अथप्रतिष्ठामयूखप्रारंभः॥पत्र९१॥

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL ASIATIC SOCIETY

श्रीगणपतयेनमः॥ महोमहत्समाराध्यजलोत्सर्गमथोक्तवान्॥प्रतिष्ठांसर्वदे
वानांनीलकंठोवदत्यसौ॥ श्रेष्ठोत्तरेप्रतिष्ठास्यादयनेशुक्लिमीहतां॥दक्षि
णेतुमुमुक्षूणांमलमासेनसाद्वयोरितिरौरवसिद्धांतशेखरोक्तेरार्द्रप्रवेशात्पू
र्वंआषाढेपिभवति॥मुंकामानंदक्षिणायनेपि॥तत्रतत्कालाविष्णुधर्मो
त्तरे॥चैत्रेवाफाल्गुनेवापिज्येष्ठेवामाधवेतथा॥माघेवासर्वदेवानांप्रति
ष्ठाशुभदासिते॥रिक्तान्यातिथिषुस्यात्सावारेभौमान्यकेतथेति॥आषाढे
द्वेतथामूलमुत्तरात्रयमेवच॥ज्येष्ठाश्रवणरोहिण्यःपूर्वाभाद्रपदातथा॥ह

तत्रैव २

स्तोश्विनीरेवतीचपुष्योमृगशिरस्तथा॥अनुराधातथास्वातीप्रतिष्ठासुप्र
शस्यतेसूतिः॥नारदस्तुचैत्रंनिषेधयति॥तेनात्रविकल्पइति॥तत्राषाढेद्वेरस्
तेनैवोत्तराषाढाप्राप्तावप्युत्तरात्रयपदमुत्तराफाल्गुन्युत्तराभाद्रपदयोरर्थ
वत्॥नारसिंहे॥तथामहाश्विनोमासउत्तमःसर्वकामदः॥देवीतत्रसदाशक्र
पांसुनापिप्रतिष्ठिता॥भवेत्तेफलदापुंसांकर्कस्थेचरविस्थिते॥नतिथिर्न
चनक्षत्रंनोपवासोत्रकारणं॥मात्तभैरववाराहनारसिंहत्रिविक्रमाः॥महि
षासुरहंत्र्यश्वस्थाप्यावैदक्षिणायने॥क्वचिन्निषेधः॥आर्द्रादिकेस्वातिवि

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

रामकालेनक्षत्रवंदेदग्नेकस्थितेर्के॥विवाहचौलव्रतबंधदीक्षासुरप्रतिष्ठादिन
कार्यमेवेति॥अथसंभाराः॥अर्कादिग्रहसमिधांप्रत्येकमष्टसहस्रं अष्टशतं
संक्षेपपक्षे॥आज्यचर्वादि॥लोकपालादियागायपलाशादिसमिधांप्रत्येक
मष्टसहस्रमष्टशतंवा॥पुष्पमालाः॥कुंकुमकर्पूर॥कस्तुरी॥चंदन॥गुग्गुल॥
धूपदहनं॥और्तिक्यं॥घंटा॥पादुका॥दर्पणं॥बलिसामग्री॥पायसभक्षभोज्य
नैवेद्यं॥होमार्थमाज्यंतिलाक्षतफलादिकं॥प्रतिकुंडंविष्टरश्चत्वारः॥प्रतिकुंड
स्रुक्स्रुवौ॥आसनार्थंत्रिसूत्रीश्वेतोर्णासूत्रं॥सर्वतोभद्रादिरचनायश्वेतरक्त

मयूख २

पीत नील रक्त श्याम वर्णकाश्चपनकलशाः॥पल्लवाः॥कदलीस्तंभपताकादशाः॥ध
जाश्चदश॥तेषांवेणवदंडाः॥वज्रमौक्तिकवैडूर्यशंखस्फटिकपुष्परागेंद्रनील
महानीलाइतिरत्नाष्टकं॥हरितालमनःशीलाभ्रकौषधी जनगंधककौशीसत्व
र्णमाक्षिकगैरिकाइतिक्षेधोष्टकं॥तिलयवमुद्गगोधूमनीवारश्यामाकसर्ष
पव्रीहयइतिबीजाष्टकं॥सुवर्णरजतताम्रलोहत्रपुसीसरागरीसाख्यंधात
ष्टकं॥मधुपर्कपात्रंसोवर्णंताम्रंवाअर्घ्यपात्रं॥रात्र्येकद्वित्रिमाषसुवर्णशला
का॥स्थापनीयकलशरत्नानि॥षोडशद्वारकलशाः॥अष्टौलोकपालकलशाः॥

कुंडकलशाः॥१

वेदिकलशाश्चत्वारःवास्तुमंडलकलशाः॥कुंडसंख्यानिद्राकलशाः॥स्नपन
कलशाःपंचचत्वारिंशत्॥कलशसंख्यायशरावाणि॥धारासहस्रान्वितोक
लशो॥गजाश्वस्थानवल्मीकसंगमकूलद्वयवराहोत्खातराजद्वारमृदः॥मु
रामांसीवचाकुष्ठशैलेयहरिद्रादारुहरिद्रासटीचंपकमुस्ताश्चेतिसर्वौषध्यः॥
पंचगव्यंपयकूपयकूव्रीहियवतिलगोधूमनीवारश्यामाकमुद्गाश्चेतिसप्तधा
न्यानि॥शय्यासोपस्कराः॥श्वेतवस्त्रंचामरंविचित्रवितानं॥त्रयोदुकूलपय
॥ऋत्विग्वरणसामग्री॥शिल्पिवस्त्रयुगमित्यादिसंभृतसंभारोमूर्तिप्रतिष्ठा ३

पंचहस्तो२+रेपूर्ववाषोडशाद्वादशहस्तंवा+१

दिनात्राकृसप्तदिनेपंचदिनेत्रिदिनेद्विदिनेसद्योवाप्रासादोत्तमंडपंवत्तात
स्मध्येचतुरस्रांसप्तहस्तांश्चतुर्हस्तांवाहस्तो
छ्रितांवेदिंमंडपोत्तरेचतुर्द्वारंस्नपनकमंडपंतत्रवेदिकात्रयंचकृत्वा
शिल्पिस्थानात्प्रासादप्रादक्षिण्येनदेवंतत्रानीयासनेनिधायचांतः प्राणा
नायम्यमासाद्यशिरव्यास्यांमूर्तौलिंगेवादेवकलासांनिध्यार्थेआयुश्रीसर्वफ
लाक्ष्यसुखकामईश्वरप्रीतिकामोऽमुकमूर्तेःलिंगस्यवाप्रतिष्ठांकरिष्ये॥ वा
इतिसंकल्प्यगणपतिपूजनंपुण्याहवाचनंचकृत्वा॥प्रतिष्ठायागनिमित्तंश्रा
तदर्धेनतृतीयभागेनचतुर्थेनभागेनवा ५

इमेतसुदुर्लभं॥यजनायात्मनःश्रेयंकरिष्येमातृपूजनमितिमंत्रमुक्त्वामातृ
पूजनंनांदीश्राद्धंचकृत्वाचार्यंवृत्वाद्वात्रिंशत्षोडशाष्टौचतुरोवाऋत्विजो
ष्टौचतुरोवाद्वारपालान्वृत्वातान्पूजयेत्॥मधुपर्कादिना॥सदस्यवरणम
पिअत्रेतित्रिविक्रमादयः॥ततोमंत्रमूर्तिर्भवानाथसंसारोछेदकारक॥देव
पूजाहोयथास्यात्कुरुधर्मोद्भवंचनः॥संसारभयभीतेनजयंयज्ञःसुभक्तितः॥
प्रारब्ध स्वत्प्रसादेननिर्विघ्नंमेभवत्विति॥आचार्यप्रार्थ्यतूर्यघोषंसपरिकरः
सपूर्णकुंभोभद्रंकलैर्भिरितिमंत्रेणमहामंडपंप्रदक्षिणीकृत्यपश्चिमद्वारे ४

णप्रविश्येत्॥तत्राचार्यः॥अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं॥सर्वेषा
मविरोधेनब्रह्मकर्मसमारभे इतिमुक्तातत्रसर्षपान्वि कीर्य॥देवाःआयां
तु॥यातुधानाःअप यांतु॥विष्णोदेवयजनंरक्षस्वेतिरक्षांकृत्वावेदिका
नेयकोणेस्थूणांवसुदायैनमः॥वसुदामावाहयामीत्यालभ्यगंधपुष्पादि
नार्चयेत्॥ततःप्रादक्षिण्येनभद्रायैनमः॥इतिद्वितीयां॥आदित्यैनमःइति
तृतीयां॥नंदायैनमइतिचतुर्थीं॥मंडपाग्नेयकोणेभूम्यैनमः१सरस्वत्यैनमः२
पूर्वसंध्यायै॰३मध्यमसंध्यायै॰४पश्चिमसंध्यायै॰५गायत्र्यै॰सावित्र्यै॰६सप

ये० आदित्ये० विनतायै० पौर्णमास्ये० सिनीवाल्येनमः॥ इतिषोडशस्थूणास्थापूजयेत्॥ नाममंत्रेणनमइतिबलिः कार्यः सर्वेभ्योनमइतिशारवोर्द्धंधनानिपूजयेत्॥ ततःपश्चिमद्वारेणनिर्गत्यपूर्वदिगादिद्वारतोरणपूजामारभेत्॥ तत्रप्राच्यांसुदृढतोरणाय०॥ अश्वत्थतोरणेनंयज्ञंरक्षसर्वविघ्नान्निवारयेतिपूजयेत्॥ अथत्रिशूलश्रृंगेषुप्रादक्षिण्येनेंद्रंधातारंभगमित्रादित्यान्संकुर्यात्॥ द्वारशारवयोर्ध्रुवमध्वरंचेतिवसुद्वयमर्चयेत्॥ शारवामूलयोर्धान्यराशयु परिरथंगभौमंप्रशांतश्रिश्रिरनामानोकलशौप्रतिष्ठाप्य ५

पूजयेत्॥ तत्तोद्वारदेशेइंद्रमावाह्यनमस्कुर्यात्॥ ॐइंद्रायोहिचित्रभानोसुतायमेत्वायवः॥ अएवीभिस्तनापूतासः॥ इतिपताध्वजंचालभ्य०॥ ॐत्रातारमिंद्रमवितारमिंद्रंहवेहवेसुहवंशूरमिंद्रं॥ कयाशचत्रआभुवदूतीसदावृधःसखा॥ कयाशचीष्ठयावृतास्तुतइंद्रस्तुवंतनः॥ इतितोरणोपरिनिदध्यात्॥ इंद्रायघृतौदनबलिदानं॥ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं॥ होतारंरत्नधातमंइतिमंत्रेणऋग्वेदंपूजयेत्॥ ऋग्वेदःपद्मपत्राक्षोगायत्रःसोमदेवतः॥ अत्रिगोत्रसुविप्रेंद्रऋत्विक्कृत्वंममरक्षभवेतिध्यानं॥ तत्रश्रीसूक्तंपावमानंचसोमसूक्तंसुमंगलं॥ पौरुषंरुद्र

सूक्तंचवामदेव्यंतथैवचेतिद्वारपालजपः॥अथाग्नेयकोणे॥अग्नयेनमःस्यन्दि
मावाह्यपूजयेत्॥ॐअग्नआयाहिवीतयेगृणानोहव्यदातये॥निहोतासि
सिबर्हिषिरतिरक्ष्वजपताकालंभः॥ॐत्वं नोअग्नेवरुणस्यविद्वान्देव
स्यहेळोवयासिसीष्ठाः॥यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्य
स्मत्॥तिपताकोच्छ्रयः॥ॐअग्निंदूतंवृणीमहेहोतारंविश्ववेदसं॥अस्य
यज्ञस्यसुक्रतुं॥इतिघृतोदनबलिः॥याम्येसुभद्रद्वारतोरणायनमः॥औदुं ६
बरतोरणेनयत्नंरक्षसर्वविघ्नान्निवारयेतिपूजयेत्॥श्रृंगेषुपूस्नेनमः॥मि

त्रायनमः॥वरुणायनमः॥इत्यादिसन्यासः॥द्वारशाखयोःसोमायनमः
॥इतिवसुद्वयमर्चयेत्॥शाखामूलयोःपर्जन्यायनमःकुंभौप्रतिष्ठाप्य
पूजयेत्॥ततोद्वारदेशेयममावाह्यनमस्कृत्वयुमायुसोमंसुनुतयुमायजुहुता
हविः॥युमंहयुज्ञोगच्छत्वग्निदूतोअरंकृतःइतिऋग्यमध्वजपताकालंभः॥युमा
युमधुमत्तमंराज्ञेहव्यंजुहोतन॥इदंनमऋषिभ्यःपूर्वजेभ्यःपूर्वेभ्यःपथिकृद्भ्यः
इतितोरणोपरिनिधानंमाषभक्तबलिदानं॥ॐइषेत्वोर्जेत्वावायवस्थोपाय
वस्थदेवोवःसविताप्रार्पयतुश्रेष्ठतमायकर्मणे॥इतियजुर्वेदंपूजयेत्॥कात

७ राक्षोघ्नुर्वेस्त्रैष्टुभोविंदैवतः॥काश्यपेयस्तुविप्रेंद्रऋत्विक्लंमेमरेभवेतियजु
र्वेदध्यानं॥तत्रआनोभद्रानुवाकश्चआप्युःश्रिग्रानकस्तथा॥यद्देवास्त्रीणि
चपठेत्ततोष्टौचपुनंतुमां॥अभिधायसिसप्तैवदीर्घायुस्तेऋचंपठेत्॥आप्या
यस्वषट्नमोअस्तुसर्पेभ्यः॥आसप्तेननमःशंभवेरुद्रैकंएकाग्निर्देवताऋ
माद्॥त्रातारमिंद्रमित्येकांसोमंराजानमेकया॥अन्नपतेमहांरुद्रऋचंवाचं
समग्रंपठेत्॥अथनिर्ऋतौनिर्ऋतिमावाह्यपूजयेत्॥मोषुणःपरापरेतिव्र ७
ह्मपताकालंभः॥असुन्वंतंसमंजहिदूणाशंयोनेतेमयः॥अस्मभ्यंमस्यवेदनं

दुद्धिसूरिश्चिदोहते॥इतिध्वजपताकोच्छ्रयणं॥निर्ऋतिंसंपूज्यमोषुणइतिव्र
ह्मन्नी ह्यनंघतसहितंबलिंदद्यात्॥अथपश्चिमायां॥सुमीमतोरणायनम
प्लुक्षतोरणेनंयत्तंरक्षसर्वविघ्रान्निवारयेतिपूजयेत्॥अथत्रिशूलेषुअर्यम्णे
नमः॥अंशवेनमः॥विवस्वतेनमइत्यादिसन्यासः॥द्वारशाखयोःअनिलायन
मः॥अनलायनमइतिवसुद्वयौ॥शरस्तंबमूलयोर्धान्यपुंजोपरिसंजीवनामृत ना
मानौकुंभौप्रतिष्ठाप्यपूजयेत्॥तत्रवरुणमावाह्यनमस्तुनद्यायामीतिश्वेत अर्चयेत्
ध्वजपताकालंभः॥उदुत्तमंवरुणपाशंमदवाधमंविमध्यमंश्रथाय॥
अथोवयमादित्यव्रतेतवानागसोअदितयेस्याम॥

॥इतितोरणो परिधानं॥नवनीतोदनबलिदानं॥अग्न आयाहिवीतयेगृ
णानोहव्यदातये॥निहोतासत्सिबर्हिषासामवेपूजयेत्॥सामवेदस्तुपिंगाक्षो
जागतःशक्रदेवतः॥भारद्वाजोविप्रेंद्रऋत्विक्कुलंमेमरवेभवेतिसामवेदध्यानं॥
तन्नजपः॥इंद्रायुसामगायतुविप्रायबृहतेबृहत्॥धुर्मुक्तेविपश्चितेपनस्य
वे॥अहमस्मिप्रथमजा॥सेतुस्तरा॥स्वादिष्ठया॥गायंतित्वागायत्रिणोर्चंत्य
र्कमर्किणः॥ब्रह्माण्डस्त्वाशतक्रतुउद्वंशमिवयेमिरे॥कस्यनूनंकतमस्यामृता
नामनामहेचारुदेवस्यनाम॥कोनोमह्याअदितयेपुनर्दात्पितरंचदृश्येयंमा

तरंच॥इत्यादि॥अथवायव्ये॥वायवेनमइतिवायुमावाह्यपूजयेत्॥वायोशुतं
हरीणांयुवस्वपोष्यांणां॥उतवातेसहस्रिणोरथआयातुपाजसा॥इतिधूम्र
ध्वजपताकालंभः॥तंवायवृतस्पतेत्वष्टर्जामातरद्भुत॥अवांस्यावृणीमहे
इतिपताकोच्छ्रयणं वायुंसंपूज्य॥यवोदनबलिदानं॥अथउत्तरे॥सुप्रभा
यतोरणायनमः॥ऋतौदुवीतितोरणालंभः॥न्यग्रोधतोरणेनंयंतंरक्षस
र्वविघ्नान्निवारयेतिपूजयेत्॥श्रृंगेषुलक्ष्मेनमः॥विष्मवेनमइत्यादिसन्या
सः॥द्वारऋक्षवयोःप्रसूषायनमः॥प्रभासायनमःइतिवसुद्वयं॥ऋक्षामू

सवित्रेनमः२

९ ऊर्ध्वोधनदश्रीप्रदनामानोकुंभोप्रतिष्ठाप्यपूजयेत्॥अत्रसोममावाह्यनमस्कृ
त्य॥सोमोधेनुंसोमोअ र्वंतमाशुंसोमोवीरंकर्मण्यंददाति॥सादन्यंविदथ्यंस
भेयंपितृश्रवणंयोददाशदस्मेइतिसुवर्णवर्णध्वजपताकालंभः॥वयंसोमव्र
८ तेतमनस्तनूषुबिभ्रतः॥प्रजावंतःसचेमहि॥तोरणोपरिनिधानंप्रियंगव
बलिदानं॥अन्नोदेवीरिष्टयथर्वणंपूजयेत्॥सुवर्णनयनोयर्वानुष्टुप्छंदःपुरंद
रःत्रेदोवेतानगोत्रसुक्रतिकृत्वंमेसर्वेभवेतितत्ध्यानं॥अथ वैगिरसं चैव ९
अथर्वाङ्गिरसंतथा॥अंगध्यायंचपठेत्॥अथेशान्येईशानायनमइतिईशान

मावाह्यपूजयेत्॥नमःशंभवेचमयोभवेचेतिरक्तध्वजपताकालंभः॥तमीशा
नमिषुहस्तं॥गवेधुकबलिः॥ईशानपूर्वयोर्मध्येअनंतायनमइतिअनंतमावा
ह्यपूजयेत्॥नमोअस्तुसर्पेभ्योयेकेचपृथिवीमनु॥येअंतरिक्षेयेदिवितेभ्यः
सर्पेभ्योनमः॥इतिमेघवर्णध्वजपताकालंभः॥तद्विष्णोःपरमंपदंसदापश्यं
तिसूरयः॥दिवीवचक्षुराततंइतिसुहस्तं॥विष्णोर्नुकंवीर्याणिप्रवोचंयःपा
र्थिवानिविममेरजांसि॥योऽअस्कभायदुत्तरंसधस्थंविचक्रमाणस्त्रेधोरु
गायइतिबलिदानं॥पश्चिमनिर्ऋतिमध्येब्रह्मणेनमइत्यावाह्यपूजयेत्॥प

देवादेवूहेळनंदेवांसश्चकुमावयं॥आदित्यास्तस्मान्मामुंचतुर्तस्यैनुमामित
इतिरक्तध्वजपताकालंभः॥ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचेवेनआ
वः॥स बुध्न्या उपमाँस्यविष्ठाःसतश्चयोनिमसतश्चविवः॥सनो
भुवनस्यपतेयस्यतउपरिगृहाइहच॥उरुब्रह्मणेस्मैक्षत्रायमहिशर्मयछ॥
इतिपायसबलिदानं॥प्राच्यांगणानांत्वेतिगणेत्रंसंपूज्यनमोअस्तुसर्पेभ्यो
येकेचपृथिवीमनु॥येअंतरिक्षेयेदिवितेभ्यःसर्पेभ्योनमइतिमंडपाद्बहिर्दि १०
ग्विदिक्षुरक्षान्संस्थाप्यतेभ्योबलिंदत्वा॥येकेचित्पृहलोंषुआगतावलि
के

कांक्षिणः॥तेभ्योबलिंप्रयछामिनमस्तुभ्यंपुनःपुनरितीत्रान्यां॥सर्वेभ्योभूतेभ्यो
नमइतिबलिंदत्वाचामेत्॥ ॥इतिमंडपपूजा॥ ॥अथगुरुर्महावेद्यांसर्वतो
भद्रदेवताःसामान्यप्रयोगोक्ताआवाह्यसंपूज्यस्वकुंडेग्निंस्थापयेत्॥ततःस
र्वेपिहोतार स्तमेवाग्निं स्वस्वकुंडेप्रणयेयुः॥ततोगुरुःप्रसादंतरीत्रान्यां
नैर्ऋत्यांवाहस्तमितवेद्यांचतुःषष्टिपदेवास्तुपीठेसामान्य प्रयोगोक्ताशिख्या
दिदेवताआवाह्यसंपूज्यताभ्योबलिंदद्यात्॥कुंडैस्वस्वशाखीयपूर्वोगोत्तरं षु
होतारःप्रतिदेवमष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिमष्टौवाप्रत्येकंसमि

त्तिलाज्यैः कुंडसंख्यया विभज्य जुहुयुर्नाममंत्रैः॥ ततः पंचसंख्यया पंचविंशतिसं
ख्यया वा बिल्वैस्तद्बीजैर्वा वास्तोष्पतइति चतस्रभिर्वास्तोष्पतेध्रुवास्थूलेति
चहुत्वाऽघोरेभ्योथघोरेभ्यो घोरघोरतरेभ्यः॥ सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽअ
स्तुरुद्ररूपेभ्यश्चाज्येनाष्टोत्तरसहस्रमष्टोत्तरशतंवा वास्तुमर्मसंधानायजुहुयुः॥
ततोराक्षोघ्नप्रावमानसूक्ताभ्यांत्रिसूत्र्याप्रासादंचसंवेष्टयपरितोजलदुग्ध
योःपथगविछिन्नेधारेदत्वापीठपूजितांहैमींवास्तुप्रतिमांदधिदूर्वासमधा ११
न्यक्षतैर्वालगंधाक्षतपुष्पयुतेऽपक्वमृद्भांडेसंस्थाप्यतस्मिधायचतुःषष्टिधाभा

समेमध्यमंत्र्यूनेत्रशुभं३

जितप्रासादाग्नेयकोणपदादुत्तरेआकाशपदे जानुमात्रंगर्तंकृत्वाजलेना
पूर्यगंधपुष्पाणिप्रक्षिप्यमृद्भांडंतत्रनिधायगर्तंतयैवमृदापूरयेन्मृदाधिक्ये त्
शुभोऽस्थंवास्तुपूजांकृत्वागुरुर्मंडपेशानभागेवेद्यांग्रहानधिदेवताःप्रत्यधि
देवताविनायकादीन्पंचलोकपालांश्चावाह्यसंपूजयेत्॥ ततः ऋत्विजःसमि
च्चर्वाज्यैरष्टोत्तरसहस्राष्टोत्तरशताष्टाविंश त्यष्टान्यतमसंख्यया कुंडेषुवि
भज्यहुत्वाबलीन्दत्वा पूर्णाहुतिंजुहुयुः॥ एतन्मंत्रप्रकारादिकं सामान्यप्रयो
गेऽुक्तं॥ अथगुरुः स्नानमंडपेऽुंनमोनारायणायेत्यभिमंत्रितेनपंचगव्येन
विश्वकर्मन्हविषाज्येनहुत्वा२

भूमिं वेदिकात्रयं संप्रोक्ष्य॥तत्र दक्षिणवेदिकायामास्तृतवालुकायामक्षतैः
स्वस्तिकं लिखित्वातत्र भद्रपीठं निधाय वेदिकायाः पश्चाद्द्वारि पूर्णांसपल्लवा
न्षष्टकलशान्मृत्पल्लवरक्षीयकषायगोमूत्रगोमयभस्मगंधोदकैः प्रपूर्यापरा
न्यंचगंधजलेनापूर्य उदक्संस्थंपंक्तिरूपेणासादयेत्॥तत्रांसस्थपतिकलशः॥
भद्रपीठयुतमध्यवेदीपश्चिमेपेवंस्थपतिकलशात्तिरिक्तान्एकादश॥भद्रपीठ
युतोत्तरवेद्यासुपरितोष्टौकलशान्पूर्वादिक्रमेणक्षारोदकक्षीरदधिसर्पिः
सुरेक्षुरसस्वादुदकगर्भोदकयुतान्॥हिरण्यगर्भःसमवर्तताग्रे भूतस्यजातःप

तिरेक॰आसीत्॥सदाधारपृथिवीद्यामुतेमांकस्मैदेवायहविषाविधेम॥यज्ञा
त्प्रावर्तदायस्यविश्वंउपासतेप्रशिषंयस्यदेवाः॥यस्यछायामृतंयस्यमृत्युः
कस्मै॰॥यःप्राणतोनिमिषतोमहित्वैकइद्राजाजगतोबभूव॥यईशेअस्यद्वि
पदश्चतुष्पदःकस्मै॰॥यस्येमेहिमवंतोमहित्वायस्यसमुद्ररसयासहाहुः॥य
स्येमाःप्रदिशोयस्यबाहूकस्मै॰॥येनद्यौरुग्राःपृथिवीचदृळ्हायेनस्वःस्तभितं
येननाकः॥योअंतरिक्षेरजसोविमानःकस्मै॰॥यंक्रंदसी अवसातस्तभानेअ
भ्यैक्षेतांमनसारेजमाने॥यत्राधिसूरउदितोविभातिकस्मै॰॥आपोहयद्बृह

तीर्विश्वमायुगर्भेदधानाजनयंतीरग्निं॥ततोदेवानांसमवर्ततासुरेकः कस्मै॰
॥यश्चिदापोमहिनापर्यपश्यद्दक्षंदधानाजनयंतीर्यज्ञं॥योदेवेष्वधिदेवएकआ
सीत्कस्मै॥इत्यष्टभिर्मंत्रैर्विन्यसेत्॥ततोन्येचवेद्याःपश्चिमभागेमुष्टिसंमितम
त्तिकागोमयगोमूत्रभस्ममीलितपंचगव्यक्षीरदधिघृतमधुशर्करायुताःदशैक स्नान
लशाःचतुर्दशशुद्धजलकलशाःअथान्यान्पंचत्रिंशत्कलशानासादयेत्॥तत्र
पंचसुरथकूपंचामृतानिपंचसुजलंपंचसुपल्लवकषायाःत आश्वत्थउदुंब
रप्लक्षचूतन्यग्रोधः॥दशक्रमात् पुष्पैःफलैःसोवर्णजलेनगोशृंगोदकेनधा १३

कांटेसाबरि

न्येःसहस्रछिद्रैःसर्वौषधीभिःपंचपल्लवैर्दूर्वाभिर्नवरत्नयुताःकार्याः॥अवशि
ष्टेषुदशसुशुद्धजलमापूर्यलोकपालानावाहयेत्॥तेषु क्रमात्॥कदंबशमी
लीजंबूअशोकप्लक्षचूतवटबिल्वनागवल्लीपलाशपल्लवयुताःकार्याः॥स
र्षिप्याकलशेषिसनेनस्थाप्यसूक्ष्मवस्त्रत्रयंसुगंधितैलंयवचूर्णमुद्वर्तनार्थं
आमलकचूर्णंसुगंधिजटामांसीशालीपिष्टंगोधूमिकांमसुरपिष्टंबिल्वचूर्णं यक्षकर्दम
चासादयेत्॥ततस्तीर्थोदककलशांश्चसमिमंत्रितजलकलशांचासाद्यतो
र्थोदककलशैसर्वैसमुद्राःसरितस्तीर्थानिजलदानदाः॥आयांतुयजमानस्य

ततश्चतुरोमंगलकलशानेकंवास्थापयेत्॥२

दुरितक्षयकारकाख्यादितीर्थान्यावाहयेत्॥ततःसयजमान आचार्योमूर्ति
स्थपतिभ्यांसहमंगलघोषेणकर्मकुटीगत्वाभूमावुपलिप्यविधिवदग्निंप्र
तिष्ठाप्यप्रतिमानिर्माणेप्राणिवधादिदोषनिरासार्थंघृतेनतिलैर्वाहोमंक
रिष्येइतिसंकल्प्याज्यभागांतंकृत्वादेवमंत्रेणाज्याहुतिशतद्वयंहुत्वापूर्णाहुतिं
हुत्वाप्रतिमांकुशैःसंमार्ज्यमधुघृताभ्यंगेनदेवस्यव्रणभंगंदूरीकृत्वासंपू
ज्यपंचगव्येनएथकूएथकूस्नापयित्वाशंखनादेनदेवंमहामंडपात्प्रदक्षिण्ये
नस्नानमंडपमानयेत्॥तत्रगुरुर्दक्षिणस्यांवेद्यांभद्रंकर्णेभिःशृणुयामदेवा

पुनःसंपूज्य२रथादिना२

भद्रंपश्येमाक्षभिर्यजत्राः॥स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेमदेवहितंयदायुः॥
इतिप्राङ्मुखंदेवंभद्रासनेनिवेश्यपूर्वकल्पितषट्कलशेषुअंसकलशंहिर
ण्यादिसहितंदेवस्यसमीपेनिधाय॥काशीकुशस्थलीमायावंत्ययोध्यामथो
पुरी॥शालग्रामंसगोकर्णंनर्मदाचसरस्वती॥तीर्थान्येतानिकुंभेस्मिन्विशं
तुब्रह्मशासनात्॥सपाशहस्तासरोजाक्षीपद्महस्तासुश्रिप्रभा॥आगछतुस
रिज्येष्ठागंगापापप्रणाशिनी॥नीलोत्पलदलश्यामापद्महस्तासुलोचना॥
आयातुयमुनादेवीकूर्मयानस्थितासदा॥प्राचीसरस्वतीपुण्यापयोष्णीगो

तमीतथा॥चर्मिलाचंद्रभागाचशरयूंडिकीतथा॥जंबुकावत्रातदुश्चकलिका
सुप्रभातथा॥वितस्ताचविपाशाचशर्मदाचपुनःपुना॥गोदावरीमहावर्त्ताशर्क
रावर्तमार्जनी॥कावेरीकौशिकीचैवतमसीयाचमहानदी॥वि टंकाप्रतिकूलाच
सोमनंदाचविश्रुता॥करतोयावेत्रवतीदेविकावेणुकाचया॥आत्रेयगंगावैतरणी
काश्मेरीलोहिनीचया॥लोविनीचशतत्रासाकल्माषासंस्थितीतथा॥वसिष्ठा
चअपाया्चसिंधुवत्सरूणीतथा॥ताम्राचैवत्रिसंध्याचतथामंदाकिनीतथा॥
नैलकालीचपाराचदुंदुभीनकुलीतथा॥नीलगंधाचवेधाचपूर्णचंद्राश्रिप्र

१५

मा॥अमरेशंप्रभासंचनैमिषंपुष्करंतथा॥आषाढिंढिंढिभारलंसारभूतंबलाक
लं॥हरिश्चंद्रंपरंगुह्यंगुह्यंमध्यमकेश्वरं॥श्रीपर्वतंसमाख्यातंजलेश्वरमतःपरं॥
आम्रातकेश्वरंचैवमहाकालंतथैवच॥केदारमुत्तमंगुह्यंमहाभैरवमेवच॥गयांचै
वकुरुक्षेत्रंगुह्यंकनखलंतथा॥विमलंचंद्रहासंचमाहेंद्रंभीममष्टमं॥वस्त्रापदं
द्रकोटिंअविमुक्तंमहालयं॥गोकर्णंभद्रकर्णंचमाहेशंस्थानमष्टमं॥छागलाक
द्विरंडंचकपर्दीटंमंडलेश्वरं॥कालंजरवनंचैवदेवदारुवनंतथा॥शंकुकर्णंतथैवेह
स्थलेश्वरमतःपरं॥एतानद्यश्चतीर्थानिगुह्यक्षेत्राणिसर्वशः॥तानिसर्वाण्यिकुंभे

१६ स्मिन्विरोनुब्रूलशासनात्॥इतिमंत्रेस्तत्रतीर्थान्यावाह्यदेवंस्नपयेत्॥यजमा
नश्चशिल्पिवर्गंयथाशक्तिपूजयेत्॥ततोगुरुर्बहिर्निर्गत्यसिद्धार्थघृतपायसैस्म
बकंयजामहेसुगंधिंपुष्टिवर्धनं॥उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥इति नू
प्राग्दिशिबलिंदत्वाचम्यदेवसमीपमागत्यशातारमिंद्रमवितारमिंद्रंहवेहवे
सुहवंशूरमिंद्रं॥कयामिन्नआभुवदूतीसदावृधःसखा॥कयाशचिष्ठयावृता॥इंद्रायादिदश
लोकपालमंत्रैर्मंडपांतर्दिक्षुरक्षांदत्वादेवस्याग्रेचतुरोब्राह्मणानुपवेश्यस्व १६
स्तिवाचयेत्॥तेभ्यश्चदक्षिणांदत्वादेवंस्नपयेत्॥अग्निर्मूर्धादिवःककुत्पतिः

पृथिव्याअयं॥अपांरेतांसिजिन्वतीतिमद्रा॥युक्ष्वायन्नोअश्वयेगिरागिरान्न
दक्षसे॥प्रप्रवयममृतंजातवेदसंप्रियंमित्रंनशंसिषमितिकषायेण॥गाय
त्यागोमूत्रेण॥गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं॥ईश्वरीसर्वभूतानां
तामिहोपह्वयेश्रियमितिगोमयेन॥मानस्तोकेतनयेमानआयोमानोगोषु
मानोअश्वेषुरीरिषः॥वीरान्मानोरुद्रभामितोवधीर्हविष्मंतःसदमित्त्वाहवा
महेतिभस्मना॥तत्सवितुरितिगंधतोयेन॥ततःपंचकलशैःपंचदेवयेः॥नमः
शंभवेचेतिप्रथमेन॥हंसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणस

मयूख

त्॥नुषद्वरुसदृतुसद्योमुसदृब्जागोजाऋतुजाअद्रिजाऋतमितिद्वितीयेन॥या
तेरुद्रशिवातनूरघोरापापकाशि नी॥तयानस्तनुवाशंतमयागिरिशंताभिचा
कशी हीतितृतीयेन॥विष्णोरराटमसिविष्णोःपृष्ठमसिविष्णोश्न्यघ्नेस्थोविष्णो
स्यूरसिविष्णोर्ध्रुवमसिवैष्णवमसिविष्णवेत्वाइतिचतुर्थेन॥ब्रह्मजज्ञानमितिपं
चमेनसंस्राप्य॥शुतंजीवशुरदोवर्धमानःशुतंहेमंतांछतमुवसंतान्॥शुतमिं
द्राग्नीसविताबृहस्पतिःशुतायुषाहविषेमंपुनर्ददिरितिदूर्वाक्षतपुष्पैःसंपूज्य १७
वस्त्रेणाछाद्यद्वितीयवेष्टांभद्रंकर्णेभिरितिमंत्रेणभद्रासनंनिधाय॥स्तीर्णेबु

हिरण्यनोयाहिवीतयेसुहस्त्येणनियुतोनियुत्वतेशुतिनाभिर्नियुत्वते॥तुभ्यंहिपू
र्वपीतयेदेवादेवायययिरे॥प्रतेसुतासोमधुमंतोअस्थिरन्मदायपुत्रऋत्वेअस्थिर
न्॥तिष्ठागम्यानूकृणानास्तीर्यतत्रप्रणवेनदेवंनिधायप्राङ्मुखउदङ्मुखोवा
भूत्वाकुंकुमाक्तेनसूत्रेणलिंगमावेष्यप्रतिमायांमुखेलिंगस्यनेत्रेणिसुवर्ण
शलाकया॥चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेरितिमंत्रेण अर्धचेन
कल्पयेत्॥ऊर्ध्वाधःपथकूर्चंतपत्रपुटद्वयं आकूस्नेनूरजसावर्तमानोनिवे
शयन्नमृतंमर्त्यंच॥हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्नितिक

ल्पयेत्॥नेत्रमध्यत्रिभागेकनीनिकामपिकल्पयेत्॥तदानकश्चिसुरतस्तिष्ठेत्॥
सुवर्णेपायसंभक्ष्यंभोज्यमादर्शंचरुंघृंदर्शयेत्॥ततःशिल्पीलोहेनोल्लिखेत्॥
गुरुर्मधुसर्पिर्भ्यामभ्यज्यदुग्धंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या
॥असिक्न्यामरुद्धेवितस्तयार्जीकीयेशृणुह्यासुषोमयातिमंत्रेणाभ्युक्ष्य
पुनर्मृद्गोमयाभ्यांस्नापयेत्॥अत्रस्नपनक्रमःपूर्वोक्तएवमंत्राःस्युः॥यजमानः
सुवर्णशलाकांस्नानवस्त्रादिकंचशिल्पिनेदत्वासहिरण्यांगांगुरवेदद्यात्॥ए १८
वंरत्नरत्नांवेद्यांभद्रासनेदेवंस्थापयित्वालौकिकैलौकिनसमुद्रज्येष्ठाःसलिल

क

स्यमध्यासुनावंसन्निविशमानाः॥इंद्रोयाजीवृषभोदक्षिणावृदृताआपोदेवीरि
हमावहंतुरुतिसंस्नाप्यसंपूज्यदूर्वाक्षतान्मूर्ध्निदत्वाप्रार्थयेत्॥नमस्तेचक्रुरे
शानिप्रवृत्तेविश्वकर्मणः॥प्रभावितौषजगद्धात्रितुभ्यंनमोनमः॥त्वयिसं
पूज्यामीशंनारायणमनामयं॥हरिताश्चौषधीषेत्वंऋद्धियुक्तासदाभवेति॥
ततोदेवस्यदक्षिणेहस्तेप्रतिमावितस्तिमात्रंऊर्णासूत्रंकनिक्रदज्जनुषंप्र
ब्रुवाणइयर्तिवाचमरितेवनावा॥सुमंगलश्चशकुनेभवासिमात्वाकाचिद
भिभाविश्वविददृतिमंत्रेणबध्नीयात्॥सर्वसत्वमयंशांतंपरंब्रह्मसनात

नं॥त्वामेवालंकरिष्यामित्वंवोभवतेनमइतिपठित्वाचतुर्दशकलशेषुच
तुष्टयमादायचतुर्भिःकलशैःस्नपयेत्॥इदमोप्रःप्रवहतुयत्किंचदुरितंम
यि॥यद्वाहमभिदुद्रोहयद्वाशेपेतानृतमिसाधेन॥अपोदेवीरुपह्वये
यत्रगावःपिबंतिनः॥सिंधुभ्यःकर्त्वंहविरितिद्वितीयेन॥इमंमेगंगेयमुनेस
रस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या॥असिक्न्यामरुद्वधेवितस्तयार्जीकी
येशृणुह्यासुषोमयेतितृतीयेन॥तत्वायामित्रब्रह्मणावंदमानस्तरात्मोस्तेय १९
मोजेनोहविर्भिः॥अहेळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीरिति

चतुर्थेन॥ततःअग्निर्मूर्धादिवःइसष्टपलमृत्तिकाकुंभेन॥वरुणस्योत्त्तं
भनमसिवरुणस्यस्कंभसर्जनमसिप्रस्तोवरुणस्यपात्रीतिशुद्धोदकेन
॥गंधद्वारामितिदशपलगोमयकलशेन॥अप्सुमेसोमोअब्रवीदंतर्विश्वानि
भेषजा॥अग्निंचविश्वशंभुवमापश्चविश्वभेषजीरितिदकेन॥तत्सवितुरि
तिद्वादशपलगोमूत्रकलशेन॥आपोहिष्ठामयोभुवस्तानऊर्जेदधातन॥म
हेरणायचक्षसेतिशुद्धोदकेन॥यस्यक्षयायजिन्वथआपोजनयथाचनः ६
तस्मारंगमामवोयस्यक्षयायजिन्वथ॥आपोजनयथाचनः॥इळेन्योवपुष्योविभावर्यप्रियोवित्रंमतिथिर्मानुषीणामितिभस्म

मुष्टिसंमित

कलशोदकेन॥योवः शिवतमोरसस्तस्यभाजयतेहनः॥उशतीरिवमातरः
तिसुद्योदकेन॥पयःपृथिव्यांपयओषधीषुपयोदिव्यंतरिक्षेपयोधां॥पर्यस्व
तीःपुरिशंसंतुमत्यंरतित्रिपलसंमितपंचगव्यकलशोदकेन॥देवीरापोअ
पांनपात्प्रतूर्मिहविष्यंदृियावान्मुदितमरतिशुद्धोदकेन॥आप्यायस्वसमे
तुतेविश्वतःसोमवृष्ण्यं॥भवावाजस्यसंगथेतिषोउग्रपलक्षीरकुंभेन॥त ६
स्माअरंगमामवोयस्यक्षयायजिन्वथ॥आपोजनयथाचनःसुदकेन॥द
धिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः॥सुरभिनोमुखाकरत्प्रणआयुं २०

रि षितौषदितिविंशतिपलदधिकुंभेन॥युंजानःप्रथमंमनस्तत्त्वायसवितायि
यः॥अग्निर्ज्योतिर्निचाय्यपृथिव्याअध्याभरत्॥रसुदकेन॥घृतवतीभुवना
नामभिश्रियोर्वीपृथ्वीमधुदुघेसुपेशसा॥द्यावापृथिवीवरूणस्यधर्मणा
विष्कभितेअजरेभूरिरेतसाऽतिसघ्नपलघृतकुंभेन॥देवस्यत्वा०रतिजले
न॥मधुवाताऋतायतेमधुक्षरंतिसिंधवः॥माध्वीर्नःसंत्वोषधीरितित्रिपल
मधुकुंभेन॥आपोअस्मान्मातरःशुंधयंतुघृतेननोघृतप्वःपुनंतु॥विश्वं
हिरिप्रंप्रवहंतिदेवीरुदिदाभ्यःशुचिरापूतएमीतिजलेन॥आयंगौःपृश्नि

रक्रमुदसदन्मातरंपुरः॥प्रितरंचप्रयत्स्वः॥ॐपलशकेराकुंभेन॥आपो हृयद्धहन्तीर्विश्वमायुन्गर्भेदधानाजुनयंतीरग्निं॥ततोदेवानांसमवर्त्तता सुरेकुःकस्मैदेवायहविषाविधेमस्रुदकेन॥प्रक्षाल्य॥यज्ञायज्ञावो अग्नयेगिरागिराचदक्षसे॥प्रप्रवयममृतंजातवेदसंप्रियंमित्रंनशंसिषमितिवस्त्रेणसंमार्ज्यसुगंधतैलेनाभ्यज्य॥द्रुपदादिवेमुमुचानः॥स्विन्नस्नात्वीमलादिव॥पूतंपवित्रेणेवाज्यं॥आपःशुंधंतुमैनसः॥तियवशालिगोधूममसुरकआमलकबिल्वचूर्णैरुद्वर्त्ययातेरुद्र॥तियक्षकर्दमेनानु २१

लिंपेत्॥यक्षकर्दमस्तु॥कस्तूरिकायाद्वौभागौद्वौभागौकुंकुमस्यच॥चंदनस्यत्रयोभागास्त्रिनस्त्वेकएवहीयुक्तः॥ततोजयामांस्यनुलिप्यमानस्तोकेतनयेमान॥प्रतद्विष्णुस्तवतेवीर्येणमृगोनभीमःकुचरोगिरिष्ठाः॥यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियंतिभुवनानिविश्वपतिलोकिककलत्रद्वयेनस्नपयित्वा॥अपोमुसोममृतोअभूमागन्मुज्योतिरविदामदेवान्॥किंनूनमस्मांकृणवदरातिःकिमुधूर्तिरमृतमर्त्यस्य॥इतिपथक्यंचामृतेन॥अयंराजाकरुणोनुमन्यतांविप्रोयथा॥संतेपयांसिसमुयंतुवाजाःसंवरुण्यांन्यभिमातिषा

हः॥आप्यायमानोऽमृताय सोमदिविश्रवांस्युत्तमानि धे॥आप्यायस्वसमेतु ते विश्वतः सोमवृष्ण्यं॥भवावाजस्य संगथे॥आप्यायस्वमदिंतमसोमविश्वैभिरंशुभिः॥देवेभ्यउत्तमंहविः॥अप्स्वग्नेसधिष्टवसौषधीरनुरुध्यसे॥गर्भेसंजायसेपुनः इतिपंचभिः क्षालयेत्॥शंतापएथिवी॰ शंयुदककलशेन॥गंधद्वारां॰ इतिगंधोदकेनास्यस्य॥युञ्जायंत्रावोऽग्नये॰॥इतिपंचपल्लवकषायकलशेनॐ॥ओषधीःप्रतिमोदध्वंपुष्पवतीःप्रसूवरीः॥अश्वाइव सजित्वरीर्वीरुधःपारयिष्णवः इतिसितपुष्पकलशोदकेन॥याःफलिनीर्या २२
याओषधीः पूर्वीर्जाते तिओषधिकलशेन॥२

अफलाअपुष्पायाश्चपुष्पिणीः॥बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसइतिअष्टपल्लवकलशोदकेन॥हिरण्यगर्भसमवर्तताग्रइतिसुवर्णोदकेन॥हविष्मतीरिमाआपोहविष्मान्देवोअध्वरोहविष्माँआविवासतिहविष्माँअस्तुसूर्यःइतिश्रृंगोदकेन॥धान्यमसिधिनुहिदेवांधिनुहियज्ञंधिनुहियज्ञपतिंधिनुहिमांयज्ञनियं॥प्राणायत्वापानायत्वाव्यानायत्वादीर्घामनुप्रसितिमायुषेधान्देवोवःसविताहिरण्यपाणिःप्रतिगृह्णातुइतिधान्योदकेन॥सहस्राक्षेणशतशारदेनशतायुषाहविषाहार्षमेनं॥शतंयथेमंशरदोनयातीन्द्रोविश्वस्य

दुरितस्यपारमितिसहस्रधारकलशेन॥ यौ ओं षधीः पूर्वाजातादेवभ्य स्त्रियुगंपु
रा॥मनैनुबभ्रूणांमहंशतंधामानिसप्तच॥सर्वौषधिजलेन॥नमोअस्तुसर्पेभ्यो
येकेचपृथिवीमनु॥येअंतरिक्षेयेदिविंतेभ्यःसर्पेभ्योनमइतिपंचपल्लवोदके
न॥यादिव्याआपःपृथिवीसंबभूवुर्याअंतरिक्षउतपार्थिवीर्याः॥हिरण्यवर्णा
युज्ञियास्तानआपःशँस्योनाभवंतुइतिदूर्वोदकेन॥अष्टौव्यख्यत्ककुभःपृ
थिव्यास्त्रीधन्वयोजनासप्तसिंधून्॥हिरण्याक्षःसवितादेवआगाद्धयद्रलाद्दु
ष्टरेवार्यालीतिरत्नोदकेन॥इमंमेगंगेतितीर्थोदककलशेन॥पुनःअष्टभिःकलशैः २२

क्षारोदकस्य

पूर्वकल्पितैःसमुद्रसंज्ञितैःस्नपयेत्॥कयानश्चित्रआभुवदूतीसदावृधःस
खा॥कयाशचिष्ठयावृता॥आप्यायस्वेतिक्षीरोदकेन॥दधिक्राव्णइतिदध्नः॥
घृतवतीतिघृतस्य॥देवंबर्हिःसुदेवंदेवैस्यात्सुवीरंवीरैर्वस्तोर्ज्येताक्तोःप्रश्नि
येतास्यान्नाम्नाबर्हिषेतोमदेमवसुवनेवसुधेयस्यवेतुयजेतिसुरोदकेन॥पयः
पृथिव्यांपयओषधीषुपयोदिव्यंतरिक्षेपयोधां॥पयस्वतीःप्रदिशःसंतुमह्यं॥ दू
आश्विभ्यांपत्नीसुकृतंबिभर्ति॥अपाःरसेनवरुणेनसाम्ना॥इंद्रश्रियेजनय
न्पुरुरूपंइतिगर्भोदकंगर्भोदकंभा गीरथिउदकं॥पुनर्दैवपल्लवैर्लोकपालक
+पयओषधीषुपयोदिव्यंतरिक्षेपयोधां॥पयस्वतीःप्रदिशःसंतुमह्यं+३

लश्चैलापयेत्॥तत्रत्राताऽमिंद्रंमवितारमिंद्रंहवेहवेसुहवंशूरमिंद्रं॥ककयामि
मुऋंपुरुहूतमिंद्रंस्वस्तिनोमघवाधात्विंद्रःस्तिकदंबपल्लवकुंभोदकेन॥तत्त्व
अग्नेवरुणस्यविद्वान्देवस्यहेळोवयासिसीष्ठाः॥यज्जिष्ठोवन्हितमःशोशुचा
नोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्तित्रोन्मलीपल्लवेन॥सुगंनुःपंथांप्रभयंकृणो
तुयंन्नक्षत्रेयुमएतिराजा॥यस्मिन्नेनमुभ्यषिंचंतदेवास्तदस्यचित्रंविहवायय
जाम॥स्तिजंबूपल्लवेन॥असुन्वंतमयजमानमिछस्तेनस्येत्यांतस्करस्यान्वेषि
ध्यन्यमस्मदिछसातंस्यानमोदेविनिर्ऋतेतुभ्यमसुरस्य शोकपल्लवेन॥तत्तो

यामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः॥अहेळमानोवरुणेहबो
ध्युरुंशंसमानआयुःप्रमोषीरितिसाक्षेण॥वायोयेतेसहस्रिणोरथासस्तेभि
रागहि॥नियुत्वान्त्सोमपीतयेस्तिचूतपल्लवेन॥वयंसोमव्रतेतवमनस्तनूषुबि
भ्रतः॥प्रजावंतःसचेमहिस्तिवटपल्लवेन॥तमीशानंजगतस्तस्थुषस्पतिंधि
यंजिन्वमवसेहूमहेवयं॥पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धस्वस्त
येस्तिबिल्वपल्लवेन॥नमोअस्तुसर्पेभ्योयेकेचपृथिवीमनु॥येअंतरिक्षेयेदि
वितेभ्यःसर्पेभ्योनमःस्तिनागपल्लवेन॥ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतः

२५ सुरुचोवेनआवः॥सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः॥
इतिपलाशपल्लवेन॥ततःसुमंगलघोषैरन्यैश्चतुर्भिरेकेनवाकुंभेनदेवंस्नप
यित्वासुगंधिनासितवस्त्रेणपरिमृज्यविश्वतश्चक्षुरुतविश्वतोमुखोविश्व
तोबाहुरुतविश्वतस्पात्॥संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएक
कलो इतिसंस्रवसदेवमावाहयेत्॥एह्येहिभगवन्विष्णोलोकानुग्रहकाम्यया॥
यज्ञभागंगृहाणेमंवासुदेवनमोस्तुते॥ततःपूजांकुर्यात्॥हिरण्यवर्णेति
पाद्यं॥हिरण्यवर्णेसर्घ्यं॥विभ्राड्बृहत्पिबतुसोम्यंमध्वायुर्दधद्यज्ञपतावहिंस २५
—
विहुतं॥वातजूतोयोअभिरक्षतित्मनाप्रजाःपुपोषपुरुधाविराजतीषाच
मनीषं॥त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं॥उर्वारुकमिवबंधनान्मृत्यो
क्षीयमामृतात्॥इतिचंदनादि॥वेदाहमेतंपुरुषंमहांतं॥आदित्यवर्णंतमसः
परस्तात्॥सर्वाणिरूपाणिविचित्यधीरः॥नामानिकृत्वाभिवदन्यदास्तेधातु
पवीतं॥अभिवस्त्रासुवसनान्यर्षाभिधेनूःसुदुघापूयमानः॥अभिचंद्रा
मतंवेनोहिरण्याभ्यश्वान्रथिनोदिवसोमेतिवस्त्रं॥वेदाहमेतंदास्तेसुत्त
रीयं॥इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं॥समूढमस्यपांसुरेतिपुष्पं॥धूर
मु

सिधूर्वधूर्वैतुधूर्वुतंयोस्मानधूर्वतिनंधूर्वयंवयंधूर्वीमः ऽतिधूपं॥चंद्रमामनं
सोजातश्चक्षोःसूर्योऽजायत॥मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजायतेतिदीपं॥
अन्नपुतेऽमृतेनोदेवनमीवस्यशुष्मिणः॥प्रप्रदातारंतारिषऊर्जंनोधेहिद्विपदे
चतुष्पदेऽतिनेवेद्यं॥आचमनंपुष्पांजलिंचदत्वाप्रार्थनांचकृत्वास्नानवस्त्रनैवे
द्यादिकंशिल्पिनेदद्यादितिदेवस्नपनविधिः॥ ॥अथदेवंपुरुषसूक्तेनस्नपय
उत्तिष्ठोत्तिष्ठगोविंदेजनिद्रांजगत्पते॥त्वयिसुप्तेजगत्सर्वंउत्थितेचोत्थितंजगदि
तितमुत्थाप्यरथमारोप्यप्रासादंदक्षिण्येनानीययागमंडपपश्चिमद्वारेणआक्र

प्रा
मंगलघोषेणमंगलसूक्तेनच+१

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

म्येनुरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंच॥हिरण्ययेनसवितारथेनादेवोयाति
भुवनानिपश्यन्निति॥प्रवेश्यवेद्याःपश्चिमभागेऽपवेश्यमधुपर्कंकुर्यात्॥ततोवे
द्यांकुशानास्तीर्यतदुपरिराज्यामास्तीर्यवेद्याःपूर्वादिदिक्षुविष्णुमधुसूदनत्रि
विक्रमवामनूआग्नेयादिकोणेषुश्रीधरहृषीकेशपद्मनाभदामोदरांश्चपूजये
त्॥शिवादिप्रतिष्ठायांतुनमःशंभवेतिराज्यांनिवेश्यभवंराजेशानंपशुपतिंरुद्रं
उग्रंभीमंमहांतंचपूर्वादिक्रमात्पूजयेत्॥ततःराज्यांदेवंराजयित्वात्रिभिर्वस्त्रै
र्वेष्टयित्वाघदेवस्यशिरोदेशेभूमोसहिरण्यंनिद्राकलशं॥अपोदेवीरपंकयेत्रेपे
ॐनमोनारायणायेतिमंत्रेणविष्णुंराज्यांनिवेशयेत्॥३

गावुःपिबंतिनः॥सिंधुभ्युःकर्त्वंहवि रितिप्रतिष्ठाप्य॥आप्यायस्वसमेतुतेविश्वतः
सोमुवृष्ण्यं॥भवावाजस्यसंगथेतिमधुसर्पिर्भ्यांदेव मभ्यज्य॥यातेरुद्रशिवातनू
रघोरापापकाशि नी॥तयानस्तनुवाशंतमयागिरिशंताभि चाकशीहितितेल
सर्षपैरुपलिप्यगंधादिनाभ्यर्च्य॥बृहस्पतेपरिदीयारथेनरक्षोहामित्रांअपबा
धमानः॥प्रभुंजंसेनाःप्रमृणोयुधाजयन्नस्माकमेध्यवितारथानामितिसितं
परिसरंदद्यात्॥अत्रैदेवस्यबृहस्पतेपरिदीयेतिमंत्रेणकंकणबंधनमिसेके॥
ततोदेवस्यपादनाभिवक्षःशिरस्तुविश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहु

रुतविश्वतस्पात्॥संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयंदेवएकः॥इत्या
लंभनंभततस्तदक्षिणपार्श्वेछत्रंव्यजनंचरणदेशेपादुकेपार्श्वयोःशांतिकुंभौ॥
आसनदर्पणघंटाभक्ष्यभोज्यजलपात्रादिकंचदेवस्यपुरतःस्थापयेत्॥ततोभ
स्मदर्भतिलैर्देवस्यपरितोरक्षार्थंप्राकारत्रयंकृत्वामंडपाद्बहिर्गत्वाप्रतिदिशं
लोकपालेभ्योगंधादिपूर्वकंबलिंदद्यात्॥भूतेभ्यश्चत्र्यंबकंयजामहेसुगंधिंपु
ष्टिवर्धनं॥उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥इतिबलिमंत्रस्तु॥पूर्व
दिग्वासिन्योदिक्पतिदिक्भूताधिपतिदिङ्नरदिग्नाथदिक्क्षेत्रपालेभ्योन

मरुतिप्रतिदिशं॥ततः आचम्यहोमंकुर्यात्॥तद्यथा॥ॐपरायविष्वात्मनेस्वाहे
तिविष्णवे॥अन्यदेवतायांशिवात्मनेरुद्रायहृदः कार्यः॥अनेनाष्टोत्तरसहस्रम
ष्टोत्तरशतमष्टाविंशतिमष्टौवाति लैर्यवैर्वाप्रसेकंहुत्वाप्रतिमायांजीवन्यासा
नूकुर्यात्॥अंपादयोः॥उंहृदये॥मंललाटेरुद्रप्रणवं न्यसेत्॥भूःपादयोः॥सु
वःहृदये॥स्वःललाटेरुद्रतिन्याहृतीर्न्यसेत्॥अंतालुके॥आंमुखे॥इंदक्षिणनेत्रे॥ २८
ईंवामनेत्रे॥उंदक्षिणश्रवणे॥ऊंवामश्रवणे॥ऋंदक्षिणगंडे॥ॠंवामगंडे॥ऌं
दक्षिणनासापुटे॥ॡंवामनासापुटे॥एंऊर्ध्वदशनेषु॥ऐंअधोदशनेषु॥ओंऊर्ध्वो

ष्ठे॥औंअधरोष्ठे॥अंललाटे॥अःजिह्वायां॥यंत्वचि॥रंचक्षुषोः॥लंनासिकायां॥वं
दशनेषु॥शंश्रोत्रयोः॥षंउदरे॥संकटिदेशे॥हंहृदये॥क्षंनाभ्यां॥लंलिंगे॥पंपंवं
भंमंदक्षिणबाहौ॥तंथंदंधंनंवामबाहौ॥टंठंडंढंणंदक्षिणजंघायां॥चंछंजंझंञं
वामजंघायां॥कंखंगंघंङंसर्वांगुलीषु॥इतिमातृकान्यासः॥ ॥रविचंद्राभ्यां
नमःनेत्रयोः॥भौमायहृदये॥बुधायस्कंधे॥बृहस्पतयेजिह्वायां॥शुक्रायलिं
गे॥शनैश्चरायललाटे॥राहवेपादयो॥केतुभ्यःकेशेषु॥रोहिणीभ्यांहृदये॥मृग
शिरसेशिरसि॥आर्द्रायैकेशेषु॥पुनर्वसूललाटे॥पुष्यायमुखे॥आश्लेषाभ्योना

भ्यां

सायां॥मघाभ्योदंतेषु॥पूर्वाफाल्गुनीभ्योदक्षिणश्रवणे॥उत्तराफाल्गुनीभ्यो
वामश्रवणे॥हस्तायहस्तयोः॥चित्रायेदक्षिणभुजे॥स्वात्येवामभुजे॥विशा
खाभ्यांऽअनूराधेभ्यःस्तनयोः॥ज्येष्ठा यै दक्षिणकुक्षौ॥मूलायवामकुक्षौ॥पू
र्वाषाढाभ्यःकटिपार्श्वयोः॥उत्तराषाढाभ्योलिंगे॥श्रवणायधनिष्ठाभ्योवृष
णयोः॥शतभिषक्भ्योनेत्रौ॥पूर्वाभाद्रपदाभ्युत्तराभाद्रपदाभ्यःऊर्वोः॥रेव
तीभ्योश्विनीभ्योजंघयोः॥भरणीभ्यःकृत्तिकाभ्यःपादयोः॥ध्रुवायनाभ्यां॥
सप्तर्षिभ्यःकंठे॥मात्रमंडलायकपिदेशे॥विष्णुपदेभ्यःपादयोः॥नागवीथ्यै

अंगवीथ्यैवनमालायां॥ताराभ्योरोमकूपेषु॥अगस्त्यायकोस्तुभे॥ ॥इतिन्यस
दिन्यासः॥चैत्रायनमःशिरसि॥वैशाखायमुखे॥ज्येष्ठायहृदये॥आषाढाय
श्रवणायस्तनयोः॥भाद्रपदायउदरे॥अश्विनायकट्यां॥कार्तिकायमार्ग
शीर्षायऊर्वोः॥पौषायमाघायजंघयोः॥फाल्गुनायपादयोः॥संवत्सरायपरि
वत्सरायइदवत्सरायानुवत्सरायनमइतिदक्षिणोर्ध्वात्प्रादक्षिण्येनचतुर्षु
बाहुषु॥पर्वभ्योनमःसंधिषु॥ऋतुभ्योलिंगेषु॥अहोरात्रेभ्योस्थिषु॥क्षणा
यलवायकाष्ठायेरोमसु॥कृतायमुखे॥त्रेतायहृदये॥द्वापरायनितंबे॥

मयूरख

कलयेपादयोः॥मन्वंतरेभ्योबाह्वोः॥परायपरार्धायजंघयोः॥महाकल्पायश्री
रीरे॥उद्गयनायदक्षिणायनायनमःपादयोः॥विष्वतेसर्वांगुलीषु॥इतिका
लन्यासः॥ ॥ब्राह्मणायमुखे॥क्षत्रियायबाह्वोः॥वैश्यायऊर्वोः॥शूद्राय
पादयोः॥संकरजेभ्यःपादाग्रे॥अनुलोमजेभ्यःसर्वांगसंधिषु॥
गोभ्योमुखे॥अजाभ्यःअविकाभ्यःहस्तयोः॥ग्रामपशुभ्यःअरण्यपशु
भ्यःऊर्वोः॥मेध्येभ्यःकेशेषु॥अश्वेभ्योरोमसु॥नदीभ्यःसर्वगात्रेषु॥समुद्रेभ्यःकु
क्षिदेशे॥इतिनोपन्यासः॥ ॥ऋग्वेदायशिरसि॥यजुर्वेदायदक्षिणभुजे॥सा ३०
इतिवर्णन्यासः॥२

मवेदायवामभुजे॥सर्वोपनिषद्भ्योहृदये॥इतिहासपुराणेभ्यःजंघयोः॥अथ
र्वांगिरसेभ्यःनाभौ॥कल्पसूत्रेभ्यःपादयोः॥व्याकरणायवक्त्रे॥तर्केभ्यःकंठे॥मी
मांसायेनिरुक्तायहृदये॥छंदःशास्त्रेभ्योज्योतिःशास्त्रेभ्योनेत्रयोः॥गीताशास्त्रे
भ्योभूतशास्त्रेभ्यःश्रोत्रयोः॥आयुर्वेदायदक्षिणभुजे॥धनुर्वेदायवामभुजे॥यो
गशास्त्रेभ्योहृदये॥नीतिशास्त्रेभ्यःपादयोः॥वास्तुतंत्रायअष्ठयोः॥इतिविद्या
न्यासः॥ ॥दिवेमूर्ध्नि॥चंद्रलोकायसूर्यलोकायनेत्रयोः॥अनिललोकायघ्रा
णे॥व्योम्नेनाभ्यां॥समुद्रेभ्योबस्तिदेशे॥पृथिव्यैपादयोः॥इतिवैराजन्यासः॥ ॥

हिरण्यगर्भायशिरसि॥रुद्रायकेशेषु॥रुद्रायललाटे॥यमायभ्रुकुट्यां॥अश्वि
भ्यांकर्णयोः॥वैश्वानरायमुखे॥मरुद्भ्योघ्राणे॥वसुभ्यःकंठे॥रुद्रेभ्योदंतेषु॥स
रस्वत्यैजिह्वायां॥इंद्रायदक्षिणभुजे॥बलयेवामभुजे॥प्रह्लादायदक्षिणस्त
ने॥विश्वकर्मणेवामस्तने॥नारदायदक्षिणकुक्षौ॥अनंतादिभ्योवामकुक्षौ
॥वरुणायहस्तयोः॥मित्रायपादयोः॥विश्वेभ्योदेवेभ्यउरुमध्ये॥पितृभ्योजा
नुमध्ये॥यक्षेभ्यःजंघयोः॥राक्षसेभ्योगुल्फयोः॥पिशाचेभ्यः असुरे ३१
भ्यःपादयोः॥विद्याधरेभ्यःपार्ष्ण्योः॥सर्पेभ्यःपादतलयोः॥गुह्यकेभ्योगुदे॥पूत

नादिभ्योनखेषु॥गंधर्वेभ्यःत्वष्टयोः॥कार्तिकेयायगणेशायकटिपार्श्वयो
॥इतिदेवयोनिन्यासः॥ ॥मत्स्यायमूर्ध्नि॥कूर्मायपादयोः॥नरसिंहायल
लाटे॥वराहायजंघयोः॥वामनायमुखे॥परशुरामायहृदि॥रामायबाहु
षु॥कृष्णायनाभ्यां॥बुद्धा यबुद्धौ॥कल्किनेजानुनि॥केशवायशिरसि॥
नारायणायमुखे॥माध वायग्रीवायां॥गोविंदायबाहोः॥विष्णवेहृदये॥
मधुसूदनायपृष्ठे॥त्रिविक्रमायकट्यां॥वामनायजठरे॥श्रीधरायहृषीके
शायजंघयोः॥पद्मनाभायगुल्फयोः॥दामोदरायपादयोः॥इतिमूर्तिन्यासः॥

३२ अश्वमेधायमूर्ध्नि॥नरमेधायललाटे॥राजसूयायमुखे॥गोसवायकंठे॥द्वाद
शाहायहृदि॥अहीनेभ्योनाभौ॥सर्वजितेभ्योदक्षिणकुक्षौ॥सर्वमेधायवामक
क्षौ॥अग्निष्टोमायलिंगे॥अतिरात्रायषणयोः॥अप्तोर्यामायऊर्वोः॥षोडशि
घा नेजानवोः॥उक्थ्यायदक्षिणजंघायां॥वाजपेयायवामजंघायां॥अग्निष्टोमा
यदक्षिणबाहौ॥चातुर्मास्यायवामबाहौ॥सोत्रामण्येहस्तेषु॥पश्विष्टिभ्यो
गुल्फेषु॥दर्शपौर्णमासायनेत्रयोः॥सर्वेष्टिभ्योरोमकूपेषु॥स्वाहाकारायवषट्
कारायस्तनयोः॥पंचमहायज्ञेभ्यःपादांगुलीषु॥आहवनीयायमुखे॥दक्षि ३२

णाग्नयेनमःहृदये॥गार्हपत्यायनाभौ॥वैश्वानरायउदरे॥प्रवर्ग्यायभूषणेषु॥सवने
भ्यःपादयोः॥ऋभुभ्योबाहुषु॥दर्भेभ्यःकेशेषु॥इतिऋतुन्यासः॥ ॥अथमूल
मंत्रन्यासआयुध न्यासशक्तिन्यासोंगन्यासेतिसाधारणःसर्व त्र॥वैश्वमधि ६
कृत्यउच्यते॥धर्मायमूर्ध्नि॥ज्ञानायहृदि॥वैराग्यायगुह्ये॥ऐश्वर्यायपादयोः॥ख
ड्गायशिरसि॥शार्ङ्गायमस्तके॥मुसलायदक्षिणभुजे॥हलायवामभुजे॥चक्राय
नाभ्यांजठरेपृष्ठे च॥शंखायलिंगेवषणाभ्यां॥गदायेजंघयोर्जानुनोश्च॥पद्माय
गुल्फयोःपादयोश्च॥वज्रायशक्रयेदंडायखड्गायपाशायध्वजायअंकुशायत्रि

शूलायचक्रायपद्मायेतिश्रिये॥इत्यायुधन्यासः॥ ॥लक्ष्म्यैललाटे॥सरस्वत्यै
मुखे॥रत्यैगुह्ये॥प्रीत्यैकंठे॥कीर्त्यैदिक्षु॥शांत्यैहृदि॥तुष्ट्यैजठरे॥पुष्ट्यैसर्वत्र॥
इतिशक्तिन्यासः॥ ॥मूलमंत्रस्य॥हृदयंहृदये॥शिरःशिरसि॥शिखाशिखा
यां॥कवचंसर्वत्र॥नेत्रयोःनेत्रे॥करयोरस्त्रं॥दक्षिणवामस्तनयोःश्रीवत्साय।
उरसि कौस्तुभायकंठे वनमालायै॥इत्यंगन्यासः॥ ॥ॐपादयोः॥नलाटोः
॥मोगुह्ये॥मनाभ्यां॥गहृदये॥वकंठे॥तेमुखे॥वानेत्रयोः॥सुभाले॥देमूर्ध्नि॥वा
दक्षिणपार्श्वे॥यउत्तरपार्श्वे॥इतिद्वादशाक्षरन्यासः॥ ॥प्रतिमायांजीवन्या ३३

सः॥ ॥तत्रतेजोभावयित्वाबुद्धींद्रियकर्मेंद्रियमनःप्राणपंचकाहंकारशब्द
तन्मात्रादिकंसर्वंसंयोज्यपुरुष मपिभावयित्वासर्वसाक्षिणंचभावयित्वातत्र
तत्वत्रयंन्यसेत्॥तद्यथा॥आत्मतत्वायनमःआत्मतत्वाधिपतयेब्रह्मणेनमःपा
दयोः॥विद्यातत्वायनमः॥विद्यातत्वाधिपतयेविष्णवेनमःहृदये॥शिवतत्वाय
नमः॥शिवतत्वाधिपतयेरुद्रायशिरसीति॥अथगायत्री न्यासः॥ ॥सूर्यस्य॥
तत्सादंगुष्ठयोः॥स्वगुल्फयोः॥विजंघयोः॥तुजान्वोः॥वंऊर्वोः॥रेगुह्ये॥णिवृष
णयोः॥यंकटिदेशे॥भनाभौ॥र्गोजठरे॥देस्तनयोः॥वहृदये॥स्यकंठे॥धीवदने॥

म तालुदेशे॥हिनासिकाग्रे॥धि चक्षुषोः॥योभ्रूमध्ये॥योललाटे॥नः पूर्वदिशि
॥प्रदक्षिणादिशि॥चोपश्चिमदिशि॥दउत्तरदिशि॥यामूर्ध्नि॥तत्सर्वत्र॥तत्स
वितुर्हृदये॥वरेण्यंशिरसि॥भर्गोदेवस्यशिखायां॥धीमहिकवचे॥धियोयो
नःनेत्रयोः॥प्रचोदयात्अस्त्रे॥इतिगायत्रीन्यासः॥ ॥अथमंत्रन्यासः॥
अग्निमीळेतिपादयोः॥इषेत्वोरितिगुल्फयोः॥शन्नोदेवीतिजान्वोः॥वह
इथंतरेरितिऊर्वोः॥स्वस्तिनोमिमीतेतिजठरे॥दीर्घायुत्वायशतशारदाय
॥शतंशरत्स्वायुषेवर्चसे॥जीवात्वेपुण्यायअहंतदस्मिमहिसत्वमेत ३४
अगुआर्याहीतिजंघयोः॥३

तत्रितिहृदये॥इन्द्रीश्वतेलक्ष्मीश्चपत्न्यौ॥अहोरात्रेपार्श्वे॥नक्षत्राणिरूपं॥अश्वि
नौव्यात्तं॥इष्टंमनिषाण॥अमुंमनिषाण॥सर्वंमनिषाणेतिकंठे॥शातारु
मिंद्रमवित्तारमिंद्रंहवेहवेसुहवंशूरमिंद्रं॥कर्यामिशचंपुरहूतमिं द्रंस्व
स्तिनोमघवाधात्विंद्रः॥वक्रे॥त्र्यंबकंरितिस्तनयोर्नेत्रयोश्च॥मूर्द्धानंदिवो
अरतिंपृथिव्यावैश्वानरमृतआजातमग्निं॥कविंसम्राजमतिथिंजनानामा
सन्नापात्रंजनयंतदेवाःइतिमूर्ध्नि॥इतिमंत्रन्यासः॥ ॥अथद्वादशाक्षरैर्णा ण
रायणस्यमूर्त्तिन्यासः॥ॐकेशवायनमःशिरसिनारायणाय०मुखे॥मो।

माधवायग्रीवायां॥भगोविंदायकंठे॥गविष्णवेदक्षे॥वमधुसूदनायकुक्षौ॥
नेत्रिविक्रमायकट्यां॥वावामनायजंघयोः॥सुश्रीधरायगुल्फे॥दृहृषीकेशा
यदक्षिणपादे॥वापद्मनाभायवोपादे॥यदामोदरायदक्षिणे॥ॐहृंहृदयायहृ
दये॥ॐविष्णवेशिरसि॥ब्रह्मणेशिखायां॥ध्रुवायकवचे॥चक्रिणेनमःअस्त्राय
फट्॥अस्त्रंहृस्तयोः॥नमःशंभवायगायत्रीदक्षिणनेत्रे॥विजयायनमःसावित्री
वामनेत्रे॥चक्रिणेचक्ररूपायपिंगलास्त्रंदिक्षु॥इत्यष्टांगविष्णुमंत्रन्यासः॥ ॥ ३५
सहस्रशीर्षेतिपादयोः॥पुरुषएवेदमितिजंघयोः॥एतावानस्येतिजान्वोः॥त्रिपा

यो:
दूर्ध्वेसुवोः॥त नोविराडितिवपणे॥तस्माद्यज्ञादितिकट्यां॥तस्माद्यज्ञात्सर्वहुतऋ
चेतिनाभ्यां॥तस्मादश्वेतिहृदि॥तंयज्ञमितिस्तनयोः॥यत्पुरुषंव्यदधुःइत्यास्ये॥ब्राह्मणो
स्यतिमुखे॥चंद्रमामनसेतिचक्षुषोः॥नाभ्याआसीतिकर्णयोः॥यत्पुरुषेणेतिश्रु
वोः॥सप्तास्यासेतिभाले॥यज्ञेनेतिशिरसि॥अद्भ्यःसंभूतःपृथिव्यैरसाच्च॥विश्व
कर्मणःसमवर्तताधि॥तस्यत्वष्टाविदधद्रूपमेति॥तत्पुरुषस्यविश्वमाजानमग्रेर ॥
तिहृदये॥वेदाहमेतंपुरुषंमहांतं॥आदित्यवर्णंतमसस्परस्तात्॥तमेवंविद्वानमृ
तइहभवति॥नान्यःपंथाविद्यतेयनायेतिशिरसि॥प्रजापतिश्चरतिगर्भेअंतः॥अ

जायमानोबहुधाविजायते॥तस्यधीराःपरिजानंतियोनिं॥मरीचीनांपदमिछंतिवे
धसः॥इतिशिखायां॥योदेवेभ्यआतपति॥योदेवानांपुरोहितः॥पूर्वोयोदेवेभ्योजा
तः॥नमोरुचायब्राह्मयेतिकवचे॥ऋचंब्राह्मंजनयंतः॥देवाअग्रेतदब्रुवन्॥य
स्त्वैवंब्राह्मणोविद्यात्॥तस्यदेवाअसन्वशे॥ह्रीश्चतेलक्ष्मीश्चपत्न्यौ॥अहोरात्रे
पार्श्वे॥नक्षत्राणिरूपं॥अश्विनौव्यात्ताम्॥इष्टंमनिषाण॥अमुंमनिषाण॥सर्वंमनि
षाणस्वाहा॥इतिपुरुषसूक्तन्यासः॥ ॥अथशिवस्यपंचब्रह्मन्यासः॥अंअंगु
ष्ठयोरीशानं॥तर्जन्योस्तत्पुरुषं॥मध्ययोरघोरं॥नाभिकयोर्वामदेवं॥कनि

अ वं

ष्ठिकयोःसद्योजातं॥ततःकनिष्ठिकयोर्हृदयं॥अनामिकयोःशिरः॥मध्यमयोः
शिखा॥तर्जन्योःकवचं॥अंगुष्ठयोरस्त्रंविन्यस्यपरेणतेजसासंयोज्यकवचे
नांगुष्ठसर्वकर्मसुनियोजयेत्॥आचमनंसर्वत्रहृदयदेवस्यकरन्यासंकृत्वा॥
लिंगमुद्रांबध्वा॥ॐईशानःसर्वविद्यानामीश्वरोमितिमंत्रेणेशानमुष्टिं बध्नीयात्
॥ततःअंगुल्यग्रेरुद्रमुद्रयामूर्ध्नि॥तत्पुरुषायविद्महेइतिएवंतर्जन्यंगुष्ठयो
र्गौतत्पुरुषमुखे॥अघोरेभ्योऽतिघोरेभ्यइतिमध्यमांगुष्ठयोर्गेनहृद्यघोरं॥वाम
देवायनमोज्येष्ठायनमइतिअंगुष्ठानामिकयोर्गेनगुह्ये॥सद्योजातंप्रपद्यामिसद्यायन

मइतिकनिष्ठिकांगुष्ठयोगेनपादावारभ्यमस्तकांतंयावन्मूर्त्तिव्यापकंनब्रह्मन्य
सेत्॥ततःईशानःसर्वविद्यानांनमःइतिशिखामुपरितंमूर्ध्नि॥ईश्वरःसर्वभू
तानामितिकल्पितंचंद्रोभयदलंपूर्वमूर्ध्नि॥ब्रह्मणोधिपतिर्ब्रह्मनमइतिदक्षं
दक्षिणमूर्ध्नि॥शिवोमेअस्तुनमइतिमरीच्यामुत्तरमूर्ध्नि॥सदाशिवोनमइति
वलिनीपश्चिममूर्ध्नि॥तत्पुरुषायविद्महेनमइतिपूर्ववक्त्रेशांतिं॥महादेवाय
धीमहीतिदक्षिणवक्त्रेविद्यां॥तन्नोरुद्रःप्रचोदयादितिपश्चिमवक्त्रेधतिं॥इति तत्पुरुषकलाचतुष्टयन्यासः॥ततोघोरेभ्योनमइति

तमोहृदये॥थघोरेभ्योनमइतिरजामुरसि॥घोरतरायेस्कंधयोः॥घोरतरेभ्यो
निद्रायेनाभौ॥सर्वेभ्यःसर्वशर्वेभ्यःपृष्ठे॥नमस्तेअ
स्तुधायेवक्षसि॥रुद्ररूपेभ्यःत्वषायेउरसि॥इतिघोरकलाः॥
रजोसि वामदेवायनमइतिगुह्ये॥ज्येष्ठायनमइतिरक्षांसिलिंगे॥श्रेष्ठायनमइति
रतिंदक्षिणोरौ॥रुद्रायनमइतिकल्पांवामोरौ॥कालायनमःकामंदक्षि
र णजानौ॥कलविकरणायनमइतिसंजीविन्यैवामजानौ॥बलविकरणायनमः
क्रियायेदक्षिणजंघायां॥बलायेवध्यैवामजंघायां॥बलप्रमथनायछायाये

दक्षिणस्फिचि॥नमऽइतिधात्रीवामस्फिचि॥सर्वभूतदमनायऽइतिश्रामणीकट्यां॥नमोमनऽइतिश्रोषणीदक्षिणपार्श्वे॥उन्मनायैऽइतिजरांवामपार्श्वे॥ नमः
ऽइतित्रयोदशकलाः॥ ॥सद्योजातंप्रपद्यामिनमऽइतिसिद्धिंदक्षिणपादे॥
वैनमो सद्योजातायैनमऽइतिऋद्धिंवामपादे॥
भवेनमऽइतिद्युतिंदक्षिणपाणौ॥अभवेनमऽइतिलक्ष्मीवामपाणौ॥
नातिभवेनमऽइतिमेधांनासायां॥भवस्वमांनमऽइतिकौंत्रिरसि॥भवनमऽ ३८
इतिस्वधांदक्षिणबाहौ॥उद्भवायनमऽइतिप्रभांवामबाहौ॥इतिसद्योजातकला
तिंन्

एकं॥ततस्समाधाःसर्वकलाअत्रविशंतितिकलांतरन्यासभावनांकृत्वामुद्रा
श्चप्रदर्श्यविधादेवंहंसंसंपाद्यहंसहंसेतिहृदयादिन्यासंकुर्यात्॥अथनरसिं
ह॥नरसिंहउग्ररूपज्वलज्वलस्वाहाऽइतिमंत्रः॥नारसिंहोयदास्थाप्यस्त्वधि
वास्यनिशागमे॥रात्रिमंवाथसाक्षाद्वापशुंदत्वाबलिंहरेत्॥एवंन्यासंकृ
त्वानिद्रामावाहयेत्॥परमेष्ठिनंनमस्कृत्यनिद्रामावाहयाम्यहं॥मोहिनींस
र्वभूतानांमनोविभ्रमकारिणीं॥विरूपाक्षेश्रियंदेवींतेआगच्छत्वंतुमोहि
नि॥वासुदेवहितेरक्तेरक्तांबरविभूषिते॥आगच्छसहसाजस्संसुसंसंसा

रमोहिनि ॥सुषुप्त्वसंहरेदेवि कुमार्येकांतमानसे॥श्रमनिश्वासनाद्यंवेआगछ
सुवनेश्वरि ॥तमः सत्वरजोपेतेआगछस्वैरचारिणि ॥मनोबुद्धिरहंकारसं
हारस्त्वंसरस्वति ॥शब्दस्पर्शश्चरूपंचरसोगंधश्चपंचमः॥आगछगृह्णसं
क्षिप्यमोहपाशनिबंधिनि ॥भवस्योत्पत्तिहेतुस्त्वंयावदाभूतसंप्लवं॥सुवःक
ल्पांतसंध्यायांवससेत्वंचराचरे॥योगिन्याप्रसुप्तस्यवासुदेवस्यशासने
त्वंप्रतिष्ठासिवैदेवि मुनियोनिसमुद्भिते ॥पितृदेवमनुष्याणांसयक्षोरग
रक्षसां॥पशुपक्षिमृगाणांचयोगमायाविवर्द्धिनि ॥वससेसर्वसत्वेषुमातेव

हितकारिणी॥एहिसावित्रिमूर्त्तिस्त्वंचक्षुर्ग्यास्थानगोचरे॥विशानासापुटेदे
विकंठेचोत्कंठतांविशा॥प्रतिभावयमांसर्वमातवदेविसुंदरि॥इदमर्घ्यंमयादत्तं
पूजेयंप्रतिगृह्यतां॥उपुष्पागंधसुमंयस्तुधस्थुमर्वाञ्छांपितरंमातरंच॥ज
याद्येवंजुष्टतमोहिगम्याअथाशास्तेदाशुषेवार्यांणिइतिमंत्रोयंतस्याःपूजावि
धेःस्मृतः॥निद्राकलशेनिद्रांपूजयित्वालोकपालमात्रक्षेत्रपालभूतेभ्योबलिंद
त्वास्थापयेदंत्रायांतःप्राच्यांसर्वतोभद्रेपूजयेत्॥विष्णुश्चेदादशारेचक्रमध्येष
दलेपद्मेमूलमंत्रेणदेवंनिवेशयेत्॥ॐहुंहृदयायनमःकर्णिकायांहृदयंपूजयेत्॥

विष्णवेनमःइतिशिरःपूर्वपत्रे॥ब्रह्मण्यायनमःइतिशिखांदक्षिणे॥धुवाय
नमःइतिकवचंपश्चिमे॥चक्रिणेनमःइतिफट्अस्त्रमुत्तरे॥शंभवायनमःइति
गायत्रीमाग्नेयदले॥विजयायनमःइतिसावित्रीमीशानदले॥ज्योतिरूपाय
नमःसरस्वतींनैर्ऋत्ये॥चक्रिरूपायनमःपिंगलास्त्रंवायव्ये॥ ॥इतिगर्भाव
रणं॥ ॥आरासुपूर्वादिक्रमेणकेशवनारायणमाधवगोविंदविष्णुमधु
सूदनत्रिविक्रमवामनश्रीधरहृषीकेशपद्मनाभदामोदरइतिद्वादशमूर्तीः ४०
पूजयेदितिद्वितीयावरणं॥प्रागादितःखड्गायनमः॥गदायैनमः॥चक्रायन

मः॥शंखायनमः॥पद्मायनमः॥हलायनमः॥मुसलायनमः॥शार्ङ्गायनमइति
तृतीयावरणं॥ ॥अथमूर्तीशाः॥पृथिवीमूर्तयेनमः॥पृथिवीमूर्त्यधिपतये
शर्वायनमः॥अग्निमूर्तयेनमः॥अग्निमूर्त्यधिपतयेपशुपतयेनमः॥यजमा
नमूर्तयेनमः॥यजमानमूर्त्यधिपतयेउग्रायनमः॥अर्कमूर्तयेनमः॥अर्कमू
र्त्यधिपतयेरुद्रायनमः॥जलमूर्तयेनमः॥जलमूर्त्यधिप तयेभवायनमः॥
वायुमूर्तयेनमः॥वायुमूर्त्यधिपतयेईशानायनमः॥इंदुमूर्तयेनमः॥इंदुमूर्त्य
धिपतयेमहादेवायनमः॥खमूर्तयेनमः॥खमूर्त्यधिपतयेभीमायनमः॥इत्त

ष्टमूर्त्तीस्तदधिपांश्चार्चयेत्॥वेरम्वे पंचैवमूर्तयः॥तदाऽथिवीमूर्तयेन
मः॥पृथिवीमूर्त्यधिपतयेवासुदेवाय॰॥दक्षिणेजलमूर्तये॰॥जलमूर्त्यधि
पतयेसंकर्षणाय॰॥पश्चिमेऽग्निमूर्तयेनमः॥अग्निमूर्त्यधिपतयेप्रद्युम्ना
य॰॥उत्तरेवायुमूर्त्तये॰॥वायुमूर्त्यधिपतयेऽनिरुद्धाय॰॥मध्येखमूर्तये॥
खमूर्त्यधिपतयेनारायणनमइति॥श्रीवेपंचमूर्तिपक्षेब्रह्मविष्णुरुद्रेश्वरस
दाशिवाएवमूर्तिपाः॥इंद्रोयंस्तुसर्वत्रपूजनीयाः॥ततःआचार्यःऋमेणपला
शोदुंबराश्वत्थापामार्गशमीसमिधांप्रत्येकंद्वादशसहस्रंघृताक्तंजुहुयात्॥

यणा द ४१

पे

स्रमष्टशतंवाहिरण्यगर्भःसमवर्ततेतिकुंडसमीसंस्थाप्यशांतिकपौष्टिकमं
त्रैर्यथाविभागंसऋत्विक्जुहुयात्॥प्रतिकुंडमेकैकोऋत्विक्मूर्तिपस्तत्तन्मं
त्रेणपूज्यः॥शन्नोवातःपवतांमातरिश्वाशन्नस्तपतुसूर्यः॥अहानिशंभवंतुन
श्शंरात्रिःप्रतिधीयतां॥शन्नइंद्राग्नीशन्नोदेवीरितिशांतिकमंत्राः॥पुष्टिर्न
रएवाक्षितिर्नएथ्वीगिरिर्नभुज्मक्षोदोनश्शंसु॥अयोनाऊर्त्स्वर्गंप्रतत्तूःसिंधु
र्नक्षोदःकरैवराते॥गयुस्फानोअमीवहावसुर्विसृष्टिवर्धनः॥सुमित्रःसोम
नोभव॥त्र्यंबकमितिपौष्टिकाः॥ततोमूर्तिपाः॥पूर्वकुंडेपलाशसमिधामष्टसह

स्विष्टस्रुतंवातिलैर्वाज्यमिश्रैःपुरोहितंयज्ञस्यदेवमृत्विजं॥होतारंरत्नधात
मंरतिजुहुयुः॥दृषेत्वोर्जेत्वा वायवस्थोपायवस्थदेवोवःसविताप्रार्पयतुश्रेष्ठ
तमायुकर्मणेतिदक्षिणे॥अग्न आयाहिवीतयेगृणानोहव्यदातये॥निहोता
सत्सिबर्हिषीतिपश्चिमे॥आजुह्वानंसुवीर्यमूर्जयन्तीरिषस्पदं॥आपोभवंतुपीतये॥शंयोरभिस्र
वंतुनऽस्युत्तरे॥यदाष्टौकुंडानितदाऽऽंवषडित्याग्नेये॥द्विप्रणवांसद्यःस्रुचंजु
होत्यनेर्ऋते॥जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः॥सनःपर्षदतिदु
र्गाणिविश्वानावेवसिंधुंदुरितात्यग्निरितिवायव्ये॥नमोब्रह्मणेनमोअस्त्वग्न

येनमःपृथिव्येनमुऽओषधीभ्यः॥नमोवाचेनमोवाचस्पतयेनमोविष्णवेमहतेक
रोमीतीशानकुंडे॥मूर्द्धानंदिवोऽरतिंपृथिव्यावैश्वानरमृतऽआजातमग्निं॥क
विंसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाःऽइतिपूर्णाहुतिंजुहुयुः॥आहु
तिसंपातानशांतिकलशेकुंडसमीपेस्थापयेयुः॥ततोमूर्तिमूर्तिपलोकपाले
भ्यःसमिद्घृतेनतिलैर्वाष्टसहस्रंवाजुहुयुः॥तेषांमंत्राः॥स्योनापृथि
वि भवानृक्षरानिवेशनी॥यच्छानःशर्मसप्रथःऽतिपृथिवीमूर्तेः॥अघोरेभ्योथ
घोरेभ्योघोरघोरतरेभ्यः॥सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यऽतिमू

र्तिपतेऽश्वस्य॥इंद्रो येंदोमरुत्वंतेपवस्वमधुमत्तमः॥ऋतस्युयोनिमासदंमितो
द्रस्य॥अग्निंदूतंवृणीमहेहोतारंविश्ववेदसं॥अस्ययज्ञस्यसुक्रतुंरग्निमूर्तेम
यःपश्नांरक्षितादिष्टितानां॥प्रजापतिःप्रथमजाऋतस्य॥सहस्रधामाजुष
ताꣳहविर्नः॥सोमापूषणेमोदेवो॥इमग्निमूर्तिपतेःपशुपतेः॥अग्नआयाहिवी
तयेगृणानोहव्यदातये॥निहोतासत्सिबर्हिषीयमेः॥असिहवीरसेन्योसिभूरि
परादृदिः॥असिदूत्रस्यचिद्रुधोयजमानायशिक्षसिसुन्वतेभूरितेवस्वितियज
मानमूर्तेः॥तमिद्रेजोहवीमिमघवानमुग्रंसत्रादधानमप्रतिष्कुतꣳशवांसि॥मं

यो हिष्ठोगीर्भिराचयद्धियेवोविश्वासुपथोरक्षेतवज्रीरतियजमानमू
र्तिपतेरग्नस्य॥युमायुसोमंसुनुतयुमायजहुताहविः॥युमंहयज्ञेगच्छत्यग्निदू
तोअरंकृतरतियमस्य॥उदुसंजातवेदसंदेवंवहंतिकेतवः॥दृशेविश्वायसूर्य
मितिसूर्यमूर्तेः॥आवोराजानमध्वरस्यरुद्रंहोतारंसत्ययजंरोदस्योः॥अग्निं
पुरानंयुत्रोरचित्ताद्विरण्यरूपमवसेकृणुध्वं॥रतिसूर्यमूर्तिपतेरद्रस्य॥अ
सुन्वंतंसमजहिदूणाꣳयोनंतेमर्यः॥अस्मभ्यमस्यवेदनंदृढिसूरिश्चिदोहते
रतिनेक्रंतेश्च॥आपोहिष्ठामयोभुव स्तानऊर्जेदधातन॥महेरणायचक्षसेर

तिजलमूर्तेः॥ब्रिभूषन्नुभयांअनुव्रतादूतोदेवानांरजसीसमीयसे॥यत्तेधीतिं
सुमतिमावृणीमहेधस्मानस्त्रिवरूथःशिवोभवेतिजलमूर्तिपतेर्भवस्य॥इमं
मेवरुणश्रुधीहवमुद्याचमृळय॥त्वामवस्युराचकेइतिवरुणस्य॥वातुआवां
तुभेषजंशंसुमयोसुनोहृदे॥प्रणआयूंषितारिषदितिवायुमूर्तेः॥तमीशानं
जगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं॥पूषानोयथावेदसामसद्वृ
धेरक्षितापायुरदब्धःस्वस्तयेइतिवायुमूर्तिपतेरीशानस्य॥आनोनियुद्भिः ४४
शतिनीभिरध्वरंसहस्रिणीभिरुपयाहियज्ञं॥वायोअस्मिन्त्सवनेमादयस्व

यूयंपातस्वस्तिभिःसदानः॥इतिवयोः॥वयंसोमव्रतेतवमनस्तनूषुबिभ्रतः॥
प्रजावंतःसचेमहिइतिसोममूर्तेः॥इंद्रंतंशुंभपुरुहन्मन्नवसेयस्यद्विताविधु
तारिं॥हस्तोवज्रःप्रतिधायिदर्शतोमुहोद्दिवेनसूर्यःइतिसोममूर्तिपतेर्महा
देवस्य॥अभिसंदेवंसवितारमोण्योःकविक्रतुमर्चामिसुष्टुतंवरेण्यंमंहि
ष्ठंमतिंमघोनांसत्रा धियस्यामतिभिर्जरेतास्वर्णपाणिरभिमीतसुक्र कविं
तुःकृपास्वः इतिकुबेरस्य॥आदित्सुस्तेतसोज्योतिष्पश्यंतिवासुरं॥पुरोय ल
दध्यतेदिवेतिखमूर्तेः॥एगोनक्षीमःकुचरोगिरिष्ठाःपरावतआजगंथापरं

स्याः॥ष्टकंसंशायपूर्विमिंद्रतुग्मंविशन्नूनताक्रिविमृधोनुदस्वरतिरवमूर्ति
पतेभीमस्य॥अभित्वादेवसवितुरीशानंवार्याणां॥सदावन्भागमीमहेर्ती
शानस्य॥ततोष्टसहस्राष्टशतान्यतमसंख्यामहाव्याहृतिभिस्तिलयवव्री
हिचरुभिः क्रमेणप्रत्येकंजुहुयुः॥ततोगुरुस्त्याप्यदेवतालिंगकेनमंत्रेणघृ
तेनतिलैर्वाष्टसहस्रमष्टशतंवाहुत्वापूर्णाहुतिंहुत्वादेवस्यदक्षिणकर्णेहो
मंनिवेद्यपूर्वकुंडेघृताक्तंस्रुष्टंमूलमंत्रेणहुत्वादेवस्यपादोस्रुक्॥मूलमं
त्रेणपूर्वोक्तसंख्यायाम्यकुंडेहस्तेनदधिहुत्वादेवनाभिं॥वारुणकुंडेक्षीरं

हुत्वाहृदयं॥सोम्यकुंडेमध्वाहुतीर्हुत्वामूर्धानं॥वारुणकुंडेमिश्रघृतादिच
तुष्टयंहुत्वातेनैवपूर्णांदत्वासर्वांगंस्रुक्॥ततःकूर्मशिलांब्रह्मशिलांपिंडि
कावाहनानिपरिचारकदेवांश्चवैदिकैर्नाममंत्रैर्वासंपूज्यमुख्यप्रतिमायांवा
मपार्श्वेधिवासयेत्॥तानिमधुघृतेनाभ्यज्यप्रक्षाल्यसंपूज्यवस्त्रेणाच्छाद्यप्र
धानप्रतिमापिंडिकायांस्वमंत्रन्यासंकुर्यात्॥तत्रविष्णुश्चेत्तस्याप्यस्तदाॐ
घंठंधंभंफेलक्ष्म्येनमः॥एतानिपंचाक्षराणिहृच्छिरः शिखाकवचनेत्रसंज्ञ
कानिहुंफडंतोवावचनसमुदायइतिपिंडिकायांपंचांगानिन्यस्यतत्त्रयमूर्तिमूर्ति

ह्रीं

पांश्चपूर्ववद्विन्यसेत्॥ततश्चॐश्रींह्रींक्षःपरब्रह्मणेसर्वाधारायनमः॥ॐश्रींह्रीं
ह्रींदिव्यतेजोधारिणिसुभगेनमइतिमंत्राभ्यामधिवास येत्॥ ॥इत्यधिवास
नं॥प्रासादोपिनूतनश्चेत्तस्याप्यधिवासनं॥तत्रप्रासादाग्रेएकाशीतिपदंम
ंडलमक्षतैःकृत्वातेषुपदेषुसप्तधान्यपुं जान्कृत्वाजलपूर्णानेकाशीतिकुं
भानाद्यतत्रनवनवकानांमध्यमंकोष्ठंत्यक्त्वामध्यपूर्वादिक्रमेणन्यस्यमध्यकुं
भेरासुदुंबराश्वत्थचंपकाशोकपलाशलक्षन्यग्रोधकदंबाम्रबिल्वाजुनैर्वृक्ष
संभवंपल्लवद्वादशकंसोमायवनस्पयंतर्गतायनमइतिनिक्षिपेत्॥ततःपञ्चकरो

तेषुकुंभानू३

सूर्यफुल १

चनादूर्वांकुरंभेपिंजूलश्वेतपीतसर्षपसितरक्तचंदनजातीकुसुमनैर्घोवर्तनमिति
दशकंपूर्वे॥यवव्रीहितिलसुवर्णरजतसमुद्रगामीनदीकूलमृत्तिकाभूम्यसंसृष्ट
गोमयमितिसप्तकमाग्नेये॥सहदेवीविष्णुक्रांताभृंगिराजमेहौषधीशमीशता
वरीगुडूचीश्यामाकमित्यष्टकंयाम्ये॥कदलीपूगफलनारिकेरबिल्वनारिंगमौतुलिं
गबदरामलकमितिफलाष्टकंनैर्ऋत्ये॥मंत्रसाधितंपंचगव्यंवारुणे॥अश्वत्थ
न्यग्रोधपलाशकषायपंचकंवायव्ये॥अंशुपुष्पीसहदेवीबलाशतावरीकु
मारीगुडूचीवचाव्योषीमूलाष्टकंसोम्ये॥वल्मीकादिसप्तमृद ईशानकुंभेनिधाय

रिंगणी १

हिरण्यवर्णाहरिणीसुवर्णरजतस्रजा॥चंद्रांहिरण्मयीलक्ष्मीजातवेदोमआवह इति
मध्यमकुंभानभिमंत्र्यशेषाणांघोदकपूरितान्मध्यमादिकलशानासमंतात्पूर्वादि
क्रमेणाष्टावष्टोविन्यस्यमूलमंत्रेणाभिमंत्र्यसूत्रेणावेष्टयंत बहिरधस्तादूर्ध्वंचत्रा
सादंपंचगव्येनसंप्रोक्ष्य॥मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निं॥
कविंसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाःइतिवल्मीकमृदाविलिप्य
समुद्रज्येष्ठाःसलिलस्यमध्यात्पुनानायंत्यनिविशमानाः॥इंद्रोयाज्रीवृषभोरणा
दताआपोदिवीरिहमामवंतितीव्रानदिकस्येनमृत्तिकाकुंभेनस्नपयेत्॥युंजातेमन ४७

वोअग्नयेगिरागिरावृदक्षसे॥प्रप्रवयममृतंजातवेदसंप्रियंमित्रंनशंसिषमितिवाय
व्यकषायकुंभेन॥पयःपृथिव्यांपयओषधीषुपयोदिव्यंतरिक्षेपयोधां॥पयस्वतीःप्र
दिशःसंतुमह्यमितिवरुणेनपंचगव्यकुंभेन॥याःफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः॥बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसइतिनैर्ऋतफलकुंभेन॥हंसःशु
चिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्॥नृषद्वरसदृतसद्व्योमसद्
ब्जागोजाऋतजाअद्रिजाऋतमितिसोम्यस्यमूलकुंभेन॥विष्णोरराटमसिविष्णोः
पृष्ठमसिविष्णोश्नप्त्रेस्थोविष्णोस्यूरसिविष्णोर्ध्रुवमसिवैष्णवमसिविष्णवेत्वा॥

पूर्वकुंभेन॥सोमोराजानमवसेग्निर्गीर्भिर्हवामहे॥आदित्योविष्णुस्सूर्योब्रह्माणंचबृ
हस्पतिंरुद्रंवरुणमिंद्रंवह्निंस्थकुंभेन॥विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतवि
श्वतस्पात्॥संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयंदेवएकइतियाम्यकुंभेन॥
नमोअस्तुसर्पेभ्योयेकेचपृथिवीमनु॥येअंतरिक्षेयेदिवितेभ्यःसर्पेभ्योनमस्ति
मध्येकुंभेन॥इदमापःप्रवहतुयत्किंचदुरितंमयि॥यद्वाहमभिदोहयद्वाशेपउ
तानृतमियष्टमिःपूर्वाकुंभेनप्रासादशिखरंस्नापयेत्॥एकाशीतिकुंभास
भवेतुगंधोदकपूरितैनैककलशैनदैव्यायकर्मणेशुंधध्वमितिसंप्रोक्ष्यसूत्रेण

वेष्यस्नपयित्वादेवरूपंप्रासादंचिंतयित्वापताकादिनाशोभयित्वागंधादिना
पूजयित्वातस्याधस्तादेवंसंचिंत्यमंत्रेणप्रासादमधिवासयेत्॥ॐह्रींसर्वदेवम
याचिंत्यसर्वरत्नोज्वलरूपेतेयावच्चंद्रश्चसूर्यश्चतावत्त्वंस्थिरोभव॥इत्यधिवास्य
पिंडिकावाहनपरिवारदेवतानांतत्तन्मंत्रैःप्रत्येकमष्टाविंशतिसंख्याकंहोमंति
लैःकृत्वामूलमंत्रेणचवैष्णवंतरश्चंहुत्वाचतत्रौविष्णुगायत्र्याद्रुग्व्याविष्णुगायत्र्या
चरुंश्रपयित्वादेवायनिवेद्यद्वादशब्राह्मणान्भोजयित्वाविष्णुर्मेप्रीयतामितिव
देत्॥ततःआचार्योयवेनुंदत्वारात्रौजागरणंकुर्यात्॥इतिप्रासादाधिवास

नं॥अत्रज्येष्ठमध्यकनिष्ठानांसप्तरात्रंपंचरात्रंत्रिरात्रमेकरात्रंसद्योवाबल्यं
तमधिवासयेत्इतिपद्धतिकाराः॥अत्रश्लोकाः॥अनेकदिननिर्वर्त्येअधिवास
नकर्मणि॥होमानष्टोसहस्रोविदधीरन्पृथक्पृथक्॥तस्मिन्नेकाहनिर्वर्त्तेकुर्या
दष्टोत्तरंशतं॥प्राग्वत्सूर्णहतिंदत्वासव्रज्यांनिद्वारपाः॥यद्वाप्रतिदिनंहोम
मष्टोत्तरशतंशतं॥देशिकोमूर्तिपैःकुर्यात्तावत्कार्यंसमाप्यते॥संध्यासुतिसृषु
बलिंमंत्रैर्दद्याद्यथोदितैः॥आचार्यदक्षिणांदद्यादृत्विक्भ्यश्चस्वशक्तितः॥
भोजनंचतथान्येभ्योदेयंवित्तानुसारतः॥विनाधिवासनंयज्ञःकृतोपि नफल ४९

+स्यपानोज्वलनिर्गमः॥ब्रह्मस्थानंयदेतच्चनाभिःपरिकीर्तिता॥हृत्पद्मंपिंडिकास्थेया ३
प्रदक्षिणं॥ततोगुरुर्बहिर्निर्गत्यप्रसादाभिमुखोभूत्वातंदेवरूपंध्यायेत्॥पादोपाद तथाहि
श्रिलास्यजंघापादोर्ध्वमुच्यते॥गर्भश्चैवोदरंज्ञेयंकटिश्चकटिमेखला॥स्तं
भाश्चबाहवोज्ञेयाघंटाजिह्वाप्रकीर्तिता॥दीपःप्राणोस्यविज्ञेयोंप्रतिमापुरु
षःस्मृतः॥पादचारस्तुहंकारोज्योंस्तुचक्षुरुच्यते॥तदूर्ध्वंप्रकृतिस्तस्यप्रतिमा ति
त्मास्मृतोबुधैः॥तलकुंभदधेद्वारंतस्यप्रजननंस्मृतं॥शुकनासाभवेन्नासागव
क्षःकर्णउच्यते॥कंठपालीस्मृतःस्कंधोग्रीवाचामलसारिकाः॥कलशास्तुशि
रोज्ञेयंमज्जादिपुरसंमितं॥मेदश्चैवसुधांविद्यात्तलेपोमांसमुच्यते॥अस्थी

निचशिलास्तस्यस्त्रायुःकीलादयःस्मृतः॥चक्षूंषिशिरवरास्तस्यध्वजाकेशाःप्रकीर्तिताः॥एवंपुरुषरूपंतंध्यात्वाचमनसासुधीः॥प्रासादंपूजयेत्सश्वागंधधूपादिभिःशुभैः॥सूत्रेणवेष्टयेद्देवंवासस्तत्परिकल्पयेत्॥प्रासादमेवमभ्यर्च्यवाहनंचाग्रमंडपेऽर्चयेत्॥ततःकुंडे॥वास्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशोअनमीवोभवानः॥यत्वेमहेप्रतितन्नोजुषस्वशंनोभवद्विपदेशंचतुष्पदेइतिमंत्रेणाष्टोत्तरशतंहुत्वादेवमंत्रेणचहुत्वापूर्णाहुतिंतंसर्वद्रव्यादिग्बलिंदत्वात्मानंनिवेद्यप्रणमेत्॥यत्रतुस्वयंभूर्देवःप्रागेववाप्रतिष्ठितः प्रासादश्चनूतनस्तत्रापितद्वत्तरेमंडपंकृत्वादेवसमीपमागत्ययथासंभवंभूस्तुवर्णादिकंदत्वादेवायचा+२

मयूरव

व

शां

५०

पूर्वेद्युःपुण्याहवाचननांदीश्राद्धदेवप्रतिष्ठोक्तमंडपस्थापनलिंगवरणादिकंकुर्यात्॥तत्रगुरुर्वेधांतदेवतामंडलंकृत्वावास्तुदेवतापूजनाग्निप्रतिष्ठाग्रहपूजाजयभागोत्तरग्रहहोमशिरव्यादिवास्तुपीठदेवतावास्तुदेवहोमैकाशीतिकलशस्थापनानिकृत्वातैःप्रासादंक्षालयित्वायजमानमभिषिंच्यप्रासादमुत्सृजेदिसेतावानेवविधिः॥अथमंडपादुत्तरतःपूर्वसंकल्पितैःशांतिकलशादिजलैःसपरिकरंयजमानमभिषिंचेयुः॥ततःआचार्यमूर्तिपब्राह्मणस्यपत्न्यादीन्परितोष्यप्रासादोत्सर्गंकुर्यात्॥तत्रमासपक्षाघुल्लिख्यइमंशिलेष्टकादार्वादिनिर्मितंबलभीज

स

५०

मूलमंत्रेण

गतीप्राकारपरिवारगोपुरपरिवारदेवालयसंयुतंतत्तद्देवतालोककामःकुलद्दया
नुग्रहायमुकदेवताप्रीतयेहमुत्सृजामीतिकुशयवजलानिक्षिप्यादेवंनत्वाब्राह्मणा
नूभोजयेदिति॥ततःप्रातराचार्यःमूर्तिमूर्तिपतिलोकपालमंत्रैश्चप्रतिदेवतमष्ट
शतमष्टाविंशतिंवापूर्णाहुत्यंतंस्वकुंडेहुत्वाधिवासितांकूर्मशिलांब्रह्मशिलांपिंडि
कांच॥त्रातारमिंद्रमवितारमिंद्रंहवेहवेसुहवंशूरमिंद्रं॥ह्वयामिशक्रंपुरुहूतमिं
द्रंस्वस्तिनोमघवाधात्विंद्रइतिगृहीत्वाविघ्नाभावार्थंपुष्पोदकधारयाअस्त्रमंत्रे
णशांतातीर्थेनवाप्रासादमस्पृश्य॥मुहांद्रोऽवसाचर्षणिप्राउतद्विबर्हीअभि

LIBRARY
BOMBAY
BRANCH
ASIATIC SOCIETY

नःसहोभिः॥अस्मयुग्वाजधेवीर्यायोरःपथुःसुकृतःकर्त्रभूत्॥इतिदर्भेणो
ल्लिख्यास्त्रपूतजलेनपुनःप्रोक्ष्यप्रासादस्यद्वा रस्यचमध्यापवेनयवार्धनवेशा
नीमुत्तरांवाश्रित्यस्नानादिसंस्कृतांकूर्मशिलांप्रणवेनपंचरत्नोपरिनिधायत
च्छत्रेसौवर्णंकूर्मद्वारसंमुखंनिधायतदुपरिरत्नानिनिधायषट्त्रिंशद्धर्तयुतां
पंचचत्वारिंशद्धर्तयुतांवाब्रह्मशिलामधिवासितांनिदध्यात्॥ॐनमोव्यापिनि
स्थिरेअचलेध्रुवे॥ॐश्रींलंस्वाहेतिमंत्रेणयथाशक्तिसंपूज्य॥त्वमेवपरमाशक्ति
स्त्वमेवासनधारिका॥शिवाजयात्वयादेवि स्थातव्यमिहसर्वदेतिप्रार्थयेत्॥ततो

वर्णाध्वनेनमः॥पदाध्वनेनमः॥मंत्राध्वनेनमः॥भुवनाध्वनेनमः॥तत्त्वाध्वनेसक
लाध्वनेनमइतिसकलमध्वानंतदारूढंध्यायेत्॥ततःपुण्याहवाचनंकृत्वामूल
मंत्रेणाष्टोत्तरशतंहुत्वाषट्त्रिंशत्सुपंचचत्वारिंशत्सुवाब्रह्मशिलागर्तेषुप्रादक्षि
ण्येनसहेमाहस्तेनरत्नन्यासंकुर्यात्॥श्वभ्रहितेब्रह्मशिलोपरिभागेसश्वभ्रं
पिंडिकांपूर्वपश्चिमाननेप्रासादेसोम्यप्रणालींदक्षिणोत्तराननेपूर्वप्रणालींशु
क्लसूत्रेनैर्दैवपत्नीलिंगकेनमंत्रेणपिंडिकामभिमंत्रयेत्॥तत्रविष्णोस्थापना
यांतुत्रीश्वतेः॥रुद्रस्य गोरीर्मिमायसलिलानितक्षत्येकपदीद्विपदीसाच

निधायर

तुष्पदी॥अष्टापदीनवपदीबभूवुषीसहस्रासरापरमेव्योमन्॥सूर्यस्य॥उषस्त
श्चित्रमाभरास्मभ्यंवाजिनीवति॥येनतोकंचतनयंचधामहे॥ततःआत्मतत्वा
यनमः॥आत्मतत्वाधिपतयेक्रियाशक्त्येनमः॥विद्यातत्वायनमः॥विद्यात
त्वाधिपतयेज्ञानशक्त्येनमः॥शिवतत्वायनमः॥शिवतत्वाधिपतयेइच्छाशक्ते
नमः॥इतितत्वन्यासः॥ ॥प्रतितत्वंमूर्तिमूर्तिपतिलोकपालान्विन्यसेत्॥
ततःआधारशक्त्येनमइतिन्यस्यानंतासनतत्वेभ्योनमः॥आसनशक्तिभ्योनम
इतुल्काभ्यर्च्य॥सर्वदेवमयीश्रीत्रैलोक्यालंकारकारिणी॥त्वांप्रतिष्ठापया
मिपिंडिकायांर

+पुत्रानायुष्मतोलक्ष्मीमचलामजरामृतां॥अभयंसर्वभूतेभ्यः कर्त्तुर्नित्यविधेहिमे॥विजयंभूपतेः+
+सर्वलोकानांक्षेममेवच॥सुभिक्ष्यंसर्वकालेनंकुरुदेविनमोनमः॥+२

मयूख

स्यत्रमंदिरेविश्वनिर्मिते॥यावच्चंद्रश्चसूर्यश्चयावद्देषावसुंधरा॥तावत्तंदेवदेवे
शिमंदिरेस्मिन्स्थिराभवेतितांप्रार्थ्यप्रणवंश्वभ्रेबाह्येषोऽस्त्रंतानूतेषांपरि
तोव्यंजनानिन्यस्य॥श्वभ्रांतेरत्नादि विन्यसेत्॥यथाबास्यपरिधोयवव्रीहिनि
ष्पावप्रियंगुतिलमाषनीवारश्यामालिसिद्धार्थकान्॥वज्रमौक्तिकवैडूर्यशंख
स्फटिकपुष्परागचंद्रकांतेंद्रनीलपद्मरागान्मनःशीलाहरितालांजन रस्य
पारा माकांजनसीसकसौराष्ट्रीरोचनागैरिकपारदान्सुवर्णरूप्यताम्रा यसत्र
पुसीसकांस्यारकूटतीक्ष्णलोहानि॥श्वेतरक्तचंदनागरुअर्जुनोशीरवेल्लवं ५३
विल्लुकांता

सहदेवीलक्ष्मणाचेति॥तत्रबीजानामभावेयवान्॥रत्नानामभावेवज्रं॥धा
तूनामभावेहरितालं॥ताम्राद्यभावेसुवर्णं॥ओषधीनामभावेसहदेवींन्यसेत्
॥एवंन्यस्तानांरत्नानांदिक्पालमंत्रैरालंभनंकृत्वापृथिवीमेरुकूर्मवाहनानि
नि सौवर्णोद्धारेमुखानिपारदंचतस्मिन्सध्यश्वभ्रेनिधायगुग्गुलुंसेनरत्नादिकंछि र
रीक्षुमधुपायसेनश्वभ्रमनुलिप्यवस्त्रेणाछादकवचेनावगुंठ्यास्त्रमंत्रेण
संरक्ष्य॥गृहावैप्रतिष्ठासूत्रंतत्प्रतिष्ठिततमयावाचाशंस्तव्यंतस्मायद्यपिदूर
स्थंपश्यंस्तत्तेगृहानेवेनानाजिघ्रमिघ्रतिगृहाहिपश्नांप्रतिष्ठाप्रतिष्ठाऽतिप्रा

सादमभिषिंचेंद्रादिभ्योबलिंदत्वाचामेत्॥एवंपिंडिकांप्रतिष्ठाप्यप्रासादाद्बहि
रष्टदिक्षुस्थंडिलानिसंपाद्यसंस्कृत्यतत्रस्थंडिलानामीशानभागेषुकलशान्मंत्र
वत्विन्यस्याग्निंप्रणीयप्रतिस्थंडिलंपलाशसमिधामष्टोत्तरसहस्रमष्टोत्तंबामू
र्मैलैत्रेणहुत्वाज्येनच॥नारायणायविद्महेवासुदेवायधीमहि॥तन्नोविष्णुःप्रचो
दयादितिमंत्रेणाष्टोत्तरशतमष्टाविंशतिमष्टोवाहुत्वाचा योष्टदिक्स्थेभ्यःपात्रे कुंभेभ्यः
तोयमुद्धृत्यमूलमंत्रेणशतकृत्वोभिमंत्र्यप्रतिमासंनिधौगत्वासर्वतीर्थमिदंज ५४
लमितिध्यायन्देवस्यमूर्ध्न्यभिषिंचेत्॥नरसिंहेनहुंफट्तेनदेवस्यदिग्बंधनंकृ

मय२

त्वामूर्तिपैःसहदेवंप्रार्थयेत्॥प्रबुध्यस्वमहाभागदेवदेवजगत्पते॥मेघश्यामग
त्मपाणेप्रबुद्धकमलेक्षण॥प्रबुध्य भूधरानंतवासुदेवनमोस्तुतइति॥जलक्षीरकु
शाग्रतिलतंडुलयवसिद्धार्थकपुष्पाणिशंखेदत्वाशंखमुद्रयादेवायार्घ्यंदत्वा॥उ
त्तिष्ठब्रह्मणस्पतेदेवयंतस्त्वेमहे॥उप्रप्रयंतुमरुतःसुदानवइंद्रप्राशूर्भवासचैसु
स्थाप्यरथमुपवेश्यदेवस्यपुरतोगुरुःएवंतोयजमानःपार्श्वतोमूर्तिपाःएवंभ्रम्य परि
रथात्रवतार्यप्रासादद्वारसंमुखंलिंगंकृत्वार्घ्यंदत्वाप्रासादंप्रवेशयेदिति॥ततःसय
जमानोदेशिकोदेवंपिंडिकायांस्थापयेत्॥तद्यथा॥सुलग्नेईश्वरंभावयन्सोव

र्णपमंश्वत्रेनिधाय॥प्रधानपुरुषोयावद्यावच्चंद्रदिवाकरौ॥तावत्त्वमनयाऋत्य
युक्तोत्रैवस्थिरोभवेत्युक्त्वा॥ध्रुवायौर्ध्रुवापृथिवीध्रुवासुःपर्वतास्त्रमेध्रुवंविश्वमिद
ंजगध्रुवेराजाविश्वामयंरतिमंत्रंपठित्वा॥यवंयवार्धं वोत्तरा स्त्रितमीशाना
वा श्रितंदेवंपिंडिकाश्वत्रेनिधायस्थिरोभवेशाश्वतोभवेति उल्कापिंडिकालिंगांत
रालंवालुकासीसकादिभिरर्द्धंपूरयित्वापुनर्नचालयेत्॥ततोदेवमूर्ध्निहृदयेवा
स्पृष्ट्वाप्राणप्रतिष्ठांकुर्यात्॥तद्यथा॥अस्यश्रीप्राणप्रतिष्ठामंत्रस्य॥ब्रह्मविष्णुरु ५५
द्रऋषयः॥ऋग्यजुःसामानिछंदांसि॥क्रियामयवपुःप्राणाख्यादेवता॥प्राणप्र

आंह्रींक्रोंइत्यादिदेवस्यसर्वेंद्रियाणि २

तिष्ठायांविनियोगः॥ॐआंह्रींक्रोंॐअंयंरंलंवंशंषंसंहंसःदेवस्यप्राणइहप्राणाः
॥पुनःआंह्रींक्रोंइत्यादिःदेवस्यजीवइहस्थितः॥पुनःआंह्रींक्रोंइत्यादिदेवस्यवाङ्म
नस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपायूपस्थ प्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वाहेति॥ध्रुवाद्यौर्ध्रुवापृथिवीध्रुवासुःपर्वतास्त्रमे॥ध्रुवंविश्वमिद
ंजगध्रुवेराजाविश्वामुयं॥ध्रुवंतेराजावरुणोध्रुवंदेवोबृहस्पतिः॥ध्रुवंत्वंइंद्रश्चा
ग्निश्चराष्ट्रंधारयतांध्रुवं॥ध्रुवंध्रुवेणहविषाभिसोमंमशीमसि॥अथोत्वंदृंहके
वलीर्विशोबलिहृतंकरत्वंइतिमूलंजपित्वादेवंसजीवंध्यात्वा॥विश्वतश्चक्षुरुत

विश्वतोमुखोविश्वतो बाहुरुतविश्वतस्पात्॥संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभू
मीजनयन्देवएकः॥सुक्रादेवमूर्ध्निहस्तंनिधायपरंदेवंध्यात्वारुद्रसूक्तैरेवतसा
मानिजस्वाप्रतिष्ठिकामंत्रानूजपेत्॥तत्रविष्णोः॥॥अतसीपुष्पसंकाशंशंखच
क्रगदाधरं॥संस्थापयामिदेवेशंदेवोभूत्वाजनार्दनं॥रुद्रस्यत्र्यक्षंचदशबाहुं
चचंद्रार्धकृतशेखरं॥गलेशंवृषभस्थंचस्थापयामित्रिलोचनं॥अथब्रह्म
णः॥ऋषिभिःसंस्तुतंदेवंचतुर्वक्त्रंजटाधरं॥पितामहंमहाप्राज्ञंस्थापयाम्यं ५६
बुजोद्भवं॥सूर्यस्य॥सहस्रकिरणंशांतंअप्सरोगणसेवितं॥पद्महस्तंमहाब

हुंस्थापयामिदिवाकरं॥ततोदेवस्यहृदयंस्मरन्नूजपेत्॥तद्यथा॥विष्णोः॥पुरु
षसूक्तं॥रुद्रस्यरौद्रसूक्तं॥ब्रह्मणेब्राह्मं ॥रवेःसौरं॥अन्येषांतत्तत्कार्यंमं का
त्रानूजपित्वाप्रणवव्याहृतिशिरःसहितांगायत्रींप्राणसूक्तंचजपित्वासांनिध्यं
कुर्यात्॥नमस्तेसत्यसंगायसंतोषपरमात्मने॥ज्ञानविज्ञानरूपायब्रह्मतेजोनु
शालिने॥गुणातिक्रांतवेगायपुरुषायमहात्मने॥अव्यक्तायपुराणायविष्णो सं
निहितोभव॥भगवन्देवदेवेशत्वंपितासर्वदेहिनां॥त्वयाव्याप्तमिदंसर्वंजगत्स्थाव
रजंगमं॥त्वमिंद्रःपावकश्चैवयमोनिर्ऋतिरेवच॥वरुणोमारुतःसोमईशानःप्र

भुरव्ययः॥येनरूपेणभगवन्नूत्व यात्यासंचराचरं॥तेनरूपेणदेवेशअ र्चायांसं
निधोभव॥सर्वमंत्रादिसंयुक्तोलोकानुग्रहकाम्यया॥अत्रार्चायांमहादेवभव
संन्निहितःसदा॥सूर्याचंद्रमसोयावद्यावत्तिष्ठतिमेदिनी॥तावत्वयात्रदेवेश
स्थातव्यंस्वेछयाप्रभोइति॥ ॥अथस्थापितस्यपरिवारदेवताः॥नंदिमहाका
लरुषभभृंगीरिटिस्कंदोमाविनायकविष्णुब्रह्मजयंतेंद्राग्नियमनैर्ऋति वरुणवा नि
युसोमेशानाप्सरोगणगंधर्वगुह्यकविद्याधरादीनरुद्रस्यब्रह्मविष्वादयोंए णोपि
वंचंडिकाविनायकादीनामपिपरिवारकल्पनं॥ततःकुंडेषंगहोमः॥तत्रपूर्वकुं ५७
परिवारदेवताः॥विष्णोर्ब्रह्मादयः २

उदरयमंत्रेणाज्याहुतिविंशतिकं॥दक्षिणकुंडेशिरोमंत्रेण॥पश्चिमकुंडेशिखा
मंत्रेण॥उत्तरकुंडे कवचमंत्रेण॥आचार्यकुंडेनेत्रमंत्रेण॥पुनःपूर्वकुंडेअस्त्रमं
त्रेणेति॥ततःआयुधमंत्रैर्हुत्वाप्रार्थयेत्॥तद्यथा॥लोकार्घहेतवेस्थिरोभव ३
सुरासन॥सांनिध्यंहिसदादेवप्रत्यहंपरिवर्तय॥माभूत्पूजाविरामोस्मिन्यजमा
नःसमध्यतां॥संपालयसतांराष्ट्रंसर्वोपद्रववर्जितं॥क्षेमेणवर्द्धिमनुलांसुख
मक्षय्यमश्नुतां॥इतिसंप्रार्थ्यविधिनादेवंसांगंसमर्चयेदिति॥ततोबहिरिंद्रादी
नूतत्तन्नाममंत्रैःस्थापयेत्॥विष्णुश्चेचंडप्रचंडजयविजयौ॥शिवश्चेन्नंदिमहा

दी

कालमंगिगणेशान्॥सूर्यश्चेदंडपिंगल माठरारुणान्॥अथशिवस्यवाहनादि
पूजयेत्॥यस्यसिंहारथेयुक्तावाघ्राभूतास्तथोरगाः॥ऋषयोलोकपालाश्च
देवस्कंदस्तथावृषः॥प्रियागणामातरश्चसोमोविष्णुःपितामहः॥नागायक्षाःसग
धर्वायेचदिव्यानभश्चराः॥तमहंयक्षमीशानंत्रिवंरुद्रमुमापतिं॥आवाहयामि
सगणंसपत्नीकंवृषध्वजं॥आगछभगवन्रुद्रानुग्रहायत्रिवोभव॥शाश्वतोम
वपूजांमेगृहाणत्वंनमोनमः॥ॐस्वागतमनुस्वागतंभगवतेनमोनमः॥सोमा
यसगणायसपरिवारायप्रतिगृह्णानुभगवान्मंत्रपूतमिदमर्घ्यंपाद्यमाचमनी ५८

यमासनंब्रह्मणाभिहितंनमोनमःस्वाहेति॥आगछभगवन्त्रिसादिकामंत्राद्यु
हेनसर्वसाधारणाः॥एवंसंपूज्यदधिदुग्धघृतमधुशर्करारूपैःसमंत्रैःमध्येसु
गंधजलयुतैःस्नापयेत्॥ततःयज्ञायज्ञेतिरुद्रमुदेतुदेवंतरुसुप्रसुतथेवेति॥दूरंगु
मंज्योतिषांज्योतिरेकंतन्मेमनःशिवसंकल्पमस्तु॥ततःविष्णोर्हृहसिबनुसोम्यं विराट्॥
मध्वायुर्दधद्रुद्रपत्नावविहुतं॥वातंजूतोयोऽभिरक्षतित्मनाप्रजाःपुपोषपुरु
धाविराजति॥सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्॥सभूमिंविश्वतोवृ
त्वात्यतिष्ठद्दशांगुलं॥अभिलाश्वरनेनुमोदुग्धाइवधेनवः॥ईशानमस्यजगतः

सुरेशानीशानमिंद्रतुष्टुषः॥पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं॥उतामृतत्वस्येशा
नोयदन्नेनातिरोहति॥

त्रिपादूर्ध्वउदैत्पुरुषःपादोस्येहाभवत्पुनः॥ततोवि
ष्वङ्व्यक्रामत्साशनानशनेअभि॥येनेदंभूतंभुवनंभविष्यत्परिगृहीतममृतेनसर्वं॥येनयज्ञस्तायतेसप्तहोतातन्मेमनःशिवसंकल्पमस्तु॥नत्वावाँअन्योदिव्यो
नपार्थिवोनजातोनजनिष्यते॥अश्वायंतोमघवंनिंद्रवाजिनोगव्यंतस्त्वाहवाम
हे॥इतिचतुरुत्तरेजपेत्॥प्रतिपर्यायं चजलेनदेवस्यपादौनाभिंवक्षःशिरश्चस्पृशे ५९

त्॥ततोलिंगमंत्रैःप्रार्थयीत॥भगवन्देवदेवेशधर्मकामार्थमोक्षद॥विधाविधे
श्वरेरुद्रैर्गणेशैर्लोकपालकैः॥देवदानवगंधर्वैर्यक्षेश्वकिंनरैःसह॥अस्मिन्लिं
गेमहादेवसर्वदावसवेप्रभो॥पुंसामनुग्रहार्थायपृथिव्यांस्वेछयाप्रभो॥परावरैकभावेनस्थातव्यंसर्वदात्वया॥सर्वविघ्नहरःपुंसांसर्वदुःखहरःसदा॥सर्वदाय
ज्ञमानस्यरक्षासंपत्करोभव॥नमस्तेसर्वधर्मायसंतोषविजितात्मने॥ज्ञानविज्ञा
नतत्त्वायब्रह्मतेजोभिशालिने॥नमस्तेशुद्धदेहायपुरुषायमहात्मने॥स्थापकानांमू
र्तिपानांशिल्पिनांचविभो सदा॥ग्रामदेशनृपाणांचशांतिर्भवतुसर्वदा॥पूजकोंध रा

कानांचभक्तानांभक्तवत्सल॥सर्वेषांचजगन्नाथरक्षासिद्धिप्रदोभव॥चंद्रार्कावनि
पर्यंतंलिंगेस्मिन्परमेश्वर॥स्थातव्यमुमयासार्धंसर्वभक्तानुकंपया॥यावच्चंद्र
श्चसूर्यश्चयावत्तिष्ठतिमेदिनी॥तावत्त्वयात्रदेवेशस्थातव्यंस्वेछयाप्रभोरिति॥
ततःपुरुषसूक्तेनविष्णोःषोडशोपचारंपूजांकृत्वापुराणमंत्रैरन्यैर्वास्तुशान
मेत्॥पुनःप्रार्थयेच्च॥ज्ञानतोज्ञानतोवापियावद्विधिरनुष्ठितः॥सर्वंतत्स
सादेनसम्पूर्णोभवतान्ममेति॥शिवस्यापि॥ज्ञानतोज्ञानतोवापिभगवन्स्थि
तंमया॥तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादादधोक्षजेति॥अथकर्तृनामयुतंदेवस्य

नामकुर्यात्॥सर्वदोंवहारार्थं॥तच्चविष्णोरमुकस्वामी॥अमुकनारायणइति
वा॥शिवस्यामुकेश्वरः॥भानोरमुकादित्यः॥देव्यामुकेश्वरी॥गणपतेरमुकविना
यकइति॥ ॥अथनैमित्तिकदोषेप्रायश्चित्तं॥ ॥तत्रस्थाप्यमानदेवार्चालिं
गंवायांयांदिशमुपाश्रयेत्तत्तद्दिगीशमंत्रेणाष्टोत्तरशतसंख्ययाशमीपलाशन्य
ग्रो
रसमिश्रहोमंतिलहोमंवाकृत्वापूर्णाहुतिंकुर्यात्॥दिगीशमंत्राः॥त्रातारमिं॥
अग्निंदूतं॥यमायसोमं॥मोषुणः॥त्वंनोअग्ने॥तववायवस्त्व॥सोमोधेनुं
सोमो॥तमीशानं॥अत्राचार्यादक्षिणाक्रमतोगजोमेषोमहिषोवृषभःशुक्तिर्मु

कांफलंसवस्त्रयुग्मांधेनुंऋषभंद्यादिकां॥तत्रस्थापयमानेदेवेशब्दोत्थानेश्वभ्रा
तेस्फुटितेवाशांत्यर्थंमूलमंत्रेणाष्टोत्तरशतंप्रतिष्ठाहोमंकुर्यात्॥श्रीवायस्थिरो हुत्वा
भवस्वाहा॥श्रीवायप्रमेयोभवस्वाहा॥श्रीवायानादिबोधोभवस्वाहा॥श्रीवाय
निर्योभवस्वाहा॥श्रीवायसर्वगोभवस्वाहा॥श्रीवायाविनाशोभवस्वाहा॥श्रि
वाया कूटोभवस्वाहेति॥अथसर्वशांत्यर्थमघोरमंत्रेणाष्टोत्तरशतंस्विष्ट
कृंतंहुत्वासर्वप्रायश्चितंचैहुत्वाईशानेबलिंदत्वाचम्य शोभना ६१
सनेयजमानमुपवेश्याथर्वणसाम्नामंत्रांतरैश्चाभिषिंचेत्॥अथाचार्यपूजनं॥
पूर्णाहुतिं२

तत्रयजमानःआचार्यमासनमुपवेश्यसत्वस्त्रग्रामंगोसहस्रमर्धतदर्धंवागोश्र
तमर्धतदर्धंवाऋषभैकादशैपंचैकांवासालंकृतांगां यथाशक्तिसन्निधाय इत्याकालो
कं संकीर्त्यदेवप्रतिष्ठासिध्यर्थमिमांदक्षिणांतुभ्यमहमाचार्यायसंप्रददेनममेसुकृत
स दुष्कृतेगोपुच्छादिकुशतिलयवजलंक्षिपेत्॥विज्ञापयेच्च॥भगवन्सर्वधर्मज्ञश्रि
वधर्मपरायण॥ सर्वशास्त्रार्थतत्वज्ञश्रिवशास्त्रविशारद॥अनादिजन्मसंता द
नेत्वप्रमेयेभवार्णवे॥अघमेसु तमंजन्मअघमेसफलंधनं॥अघमेजननो
छित्तिरघमेपरमंपदं॥मोचितोहंत्वयानाथदुष्टेघाऽवबंधनात्॥ईशात्रा

या मयूरव

स्वयंस्यात्सलवेनेवभवार्णवात्॥मुक्तोहंमर्त्यसंसारादापन्नोहंनवांतिकं॥ज्ञान
तोज्ञानतोवापियन्यूनंयत्कृतंमया॥तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादात्सदाशिव
ति॥गुरुरपि॥समस्तजगदुत्पत्तिस्थितिसंहारकारकः॥श्रिवःसानुचरस्तवत्सु
र्वदासर्वकामदः॥द्रव्यहीनंतुयत्किंचिद्विधिहीनंतुयद्भवेत्॥तत्सर्वंपूर्णमेवा
स्तुप्रसादात्कारणस्यतु॥स्थापकस्यमूर्तिपानांवर्णिनांश्रिल्पिनांतथा॥सरा
ष्ट्रपार्थिवानांचशांतिर्भवतुसर्वदा॥भस्यपुत्रकलत्रैश्चस्वमित्रबलवाहनैः॥क
रणस्यप्रसादेनसर्वलोकेश्वरोभवे सुक्तायजमानायाशिषंदद्यात्॥ततः

स्थापकमूर्तिपजपिनःस्त्रीकस्यपतिर्देवस्त्रास्संपूज्यतेभ्यःशक्तितोदक्षिणांदद्या
सनं त्॥अधिवासघोवाबहुकालसाध्यंवातत्रसद्यःपक्षेवक्ष्यमाणैःकुंकुमादिसर्व मधु
द्रव्यैस्तद्दिनएवदेवं लेपयेत्॥अन्येतुप्रथमेहनिकुंकुमेनदेवंलेपयित्वापूजयेत्॥
द्वियेतीदिनेहरिद्रासिद्धार्थकचूर्णेन॥एवंतृतीयदिनेपिष्टसितचंदनयवचूर्णे
न॥चतुर्थेमनःशिलाप्रियंगुचूर्णेन॥पंचमेरक्तांजनतिलचूर्णेन॥षष्ठेरक्तचंद
रोचना नपद्मकेसरचूर्णेन॥सप्तमेनागकेसरचूर्णेन॥सर्वलेपद्रव्येषुकपिलाघृतमिश्र
णंक्षेयं॥प्रतिमानांलेपत्रयंदिनत्रयेक्रमेणदत्त्वाशेषलेपांश्चतुर्दिनेयुगपत्कृत्वा र्थं

त्रिसंध्यंबलिदानंचनिर्वर्त्यप्रतिकुंडंहवनंसंपादयेत्॥शांतिहोमंचऋत्विजःकु
र्युरित्यनेकदिननिर्वर्त्यधिवासनेतेयं॥शिवस्तुयदीतिष्ठोत्तरकालंसप्तसुदिने
षुमधुकुंकुमादिलेपाःक्रियंतेतदाष्टमदिनेस्नपनार्चनादिमहानुत्सवोधेयः॥ ॥
इतिसर्वदेवप्रतिष्ठाविधिः॥ ॥अथचतुर्थीकर्म॥ ॥तच्चतुर्थदिनेद्वितीयदि
नेवाकुर्यात्॥तत्रप्राक्वत एवाचार्योमूर्तिपयजमानद्वारपालादिभिःसहमंड
पंपश्चिमद्वारेणप्रविश्यतत्रमहास्नानसंभारादिकमुपकल्प्यवेद्याःप्रादक्षिण्ये
नगत्वाकुंडेस्थापितदेवसंचरंश्चपयित्वापंचब्रह्मभिरंगसहितैःसहस्रहुतिहो

ब्रह्मज्ञानंप्रथमंपुरस्ता०॥सुगंनःपंथामभयंकृणोतु।यस्मिन्नक्षत्रेयमएतिराजा।
यस्मिन्नेनमभ्यषिंचंतदेवाः।तदस्यचित्रंहविषायजाम।१

मंकुर्यात्॥ब्रह्ममंत्रायथा॥ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिप
तिर्ब्रह्मणोधिपतिर्ब्रह्मशिवोमेअस्तुसदाशिवों॥तत्पुरुषायविद्महेमहादेवाय
धीमहि॥तन्नोरुद्रःप्रचोदयात्॥अघोरेभ्योथघोरेभ्यो घोरघोरतरेभ्यः॥सर्वेभ्यः
सर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः॥वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमो
रुद्रायनमःकालायनमःकलविकरणायनमोबलविकरणायनमोबला
यनमोबलप्रमथनायनमोमनोन्मनायनमः॥सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः॥
भवेभवेनातिभवेभवस्वमांभवोद्भवायनमइतिप्रागुक्ताः॥अंगमंत्राअपि॥अघ्रयः
नमःसर्वभूतदमनायनमः

मयूख

६४

संभृतः पृथिव्यै रसाच्च॥विश्वकर्मणः समवर्तताधि॥तस्य त्वष्टा विदधद्रूपमेति॥त
सुरेषु विश्वमाजानमग्रे॥वेदाहमेतं पुरुषं महान्तं॥आदित्यवर्णं तमसः परस्ता
न्॥तमेवं विद्वान्मृत इह भवति॥नान्यः पन्था विद्यतेयनाय॥प्रजापतिश्चरति गर्भे अं
तः॥अजायमानो बहुधा विजायते॥तस्य धीराः परिजानन्ति योनिं॥मरीचीनां प
दमिच्छन्ति वेधसः॥योवै भ्रजानपति॥योदेवानां पुरोहितः॥पूर्वो योदेवेभ्यो जा
तः॥नमो रुचाय ब्राह्मये॥रुचं ब्राह्मं जनयन्तः॥देवा अग्रे तदब्रुवन्॥यस्त्वैवं ब्रा
ह्मणो विद्यात्॥तस्य देवा असन्वशे॥ततः ऋत्विजो घृतेनतिलैर्वा कुंडेषु

स्व

अघोरेभ्योथ घोरेभ्यः॥२

च२

स्नानंस्नानं कृत्वागोरीर्मिमायसलिलानितक्षसेकपदीद्विपदीसाचतुष्पदी
॥अष्टापदीनवपदीबभूवुषीसहस्राक्षरापरमेव्योमन्निति मंत्रेणाज्यं जुहुयात्॥ यु
त्रिवस्यचतुर्थीकर्म॥एवमन्यदेवविषयेपिपूर्ववत्स्थापितदेवंसंचरं अप
यित्वास्वमंत्रैः पत्नीमंत्रैश्चसहस्रहोमंकुर्यात्॥ऋत्विजोपिघृतेनस्नानंस्ना
नंप्रतिकुंडंहुत्वापूर्णाहुतिंजुहुयुः॥गुरुश्चस्नालितोयेनमूर्त्तिंसिक्त्वानिर्माल्य
मपसार्यपुनः पूजयित्वैकारतिंघटान्पूर्ववत्स्थापयेदिति॥यद्वापुरा
णांतरोक्तप्रकारेणपूजयेत्॥दध्यक्षतकुशाग्रक्षीरदूर्वामधुयवसिद्धार्थक व

तत्र

पुष्पफल तोयान्वितमर्घ्यपात्रमासाद्य कलशाष्टसहस्रमष्टशतमष्टोत्तरो
वा कलशान्सौवर्णान्राजतान्ताम्रान्मृन्मयान्वोपकल्प्येतेषु
रान्नोदेवीरभिष्टयआपोभवंतुपीतये॥शंयोरभिस्रवंतुनः॥आपोहिष्ठामयोभु
व स्तानऊर्जेदधातन॥महेरणायचक्षसे॥इतिमंत्रैरष्टतंतीर्थजलंप्रक्षिप्य
सहोमयक्षीरदधिमधुघृतशर्करौषधि पुष्पफलकुशरत्नगंधपंचगव्यादि
कंचप्रक्षिप्य॥ततःसमुद्रंवःप्रहिणोमिस्वांयोनिमपिगछत॥अरिष्टास्मा
कंवीरामपिगावःसंतुगोपतौ॥इतिमंत्रेणैरेवार्घ्यसमर्घ्यस्नापयेत्॥तच ६५

था॥पंचनघृतिपंचगव्येन॥दधिक्रावणोअकारिषंजिष्णोरश्वस्यवाजिनः॥सु
रभिनोमुखाकरत्प्रणआयूंषितारिषत्॥इतिदध्ना॥आप्यायस्वसमेतुतेविश्वतः
सोमवृष्ण्यं॥भवावाजस्यसंगथे॥इतिक्षीरेण॥शुक्रमसि ज्योतिरसितेजो
सीति घृतेन॥मधुवातोऋतायतेमधुक्षरंतिसिंधवः॥माध्वीर्नःसंत्वो
षधीः॥मधुनक्तमुतोषसोमधुमत्पार्थिवंरजः॥मधुद्यौरस्तुनःपिता॥मधुमा
न्नोवनस्पतिर्मधुमांअस्तुसूर्यः॥माध्वीर्गावोभवंतुनः॥इतिमधुना॥देवस्यत्वा
सवितुःप्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां॥सरस्वत्यैभेषज्येन॥ची

पुष्पोदकेन

यौंयु॰ना॰घा॰यु॰भिषिंचामीति॥परिव्राजंपतिःकविरग्निर्हव्यान्यक्रमीत्॥दधृ
द्ग्लानिदाशुषे॥इतिरत्नोदकेन॥देवस्यत्वासवितुःप्रसवेऽश्विनोर्बाहुभ्यां
पूष्णोहस्ताभ्यां॥अग्नेस्तेजसासूर्यस्यवर्चसाऽरंद्रस्येंद्रियेणाभिषिंचामीति
कुशोदकेन॥अग्नआयाहिवीतयेगृणानोहव्यदातये॥निहोतासत्सिबर्हिषी
तिफलोदकेन॥समुद्रज्येष्ठाःसलिलस्यम॰॥याआपोदिव्या॰॥यासांराजावरु
णो॰॥यासुराजावरुणोयासु॰॥इतिपूर्वकल्पितशीतलजलेन॥वसोःपवित्र
मसि शतधारंवसोःपवित्रमसिसहस्रधारंवसोःपवित्रमसिसहस्रधाराकुंभेन॥ततस्तु
+गायत्र्यागंधोदकेन॥ओषधयःप्रतिमोदध्वमितिसहदेवी व्याघ्रीबलातिबलाशंखपुष्पी
+देवस्त्वासवितापुनातुवसोःपवित्रेणसुदुघाकामधुक्षः॥+१

स्नपनं॥ततःअंभस्यांभोवोभक्षीयमहस्यमहोवोभक्षीयसहस्यसहोवो
भक्षीयोर्जस्योर्जेवोभक्षीय॥इतिपंचवर्णसूत्रेणनीराज्यबलिंहरति॥मुंचंतु
मात्रापुष्पाइदधोवरुणादुत॥अथोयुमस्मदुद्भवाःसर्वस्माद्देवकिल्बिषादि
तिकोतुकसूत्रंविमुच्यसुगंधवस्त्रेणपंचनद्यइतिदेवंपरिमार्ष्टि॥मंदाकिन्या
स्तुयद्वारिसर्वपापहरंशुभं॥तदिदंकल्पितंदेवसम्यगाचम्यतांत्वयेसाचमनीयं
निवेदयेत्॥वेदसूत्रसमायुक्तेयज्ञोपकरणान्विते॥सर्ववर्णप्रदेदेववाससीदेव
निर्मितेतिवस्त्रयुग्मं॥शरीरंतेनजानामिचेष्टांनैवचनैवच॥मयानिवेदितंभक्त्या

चंदनंप्रतिगृह्यतामितिकुंकुमकर्पूरयुक्तचंदनं॥मणिमुक्ताप्रवालाद्यैःस्वर्णपुष्पै
र्मयाकृतां॥पूजांतुदेवदेवेशप्रसादाद्भवनस्तवेतिपुष्पं॥वनस्पतिरसोद्भवोगं
धाढ्यःसुमनोहरः॥आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतामितिधूपमंत्रः॥तं
चंद्रस्त्वंरविर्विद्युत्त्वंरत्नानिहुताशनः॥त्वमेवसर्वज्योतींषिदीपोयंप्रतिगृह्यता
मि यत्रीयाचत्वारिंशतावादीपेरारार्तिकं॥अन्नंचतुर्विधंस्वादुरसैःषड्भिःस
मन्वितं॥भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यतामितिनैवेद्यं॥सुभूषितायनमर्
तिभूषणानिदत्वापूर्वकृतंहोमंनिवेद्यप्रार्थयेत्॥यन्मयाभक्तियोगेनपत्रंपुष्पंफ

६७

लंजलं॥आवेदितंचनेवेद्यंतद्गृहाणानुकंपया॥मंत्रहीनंक्रियाहीनंभक्तिहीनंजना
र्दन॥यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे॥ततःपुनरष्टोत्तरसहस्रंमूलमं
त्रेणहुत्वांगानांदशांशेनपूर्णाहुतिंदत्वास्विष्टिवाचनंकारयित्वाऋंत्विग्भ्यो
बलिंदत्वाचम्य शेषंसमापयेदितिचतुर्थीकर्मविधिः॥ ॥अथशैवेचंडपू
जा॥ ॥चतुर्थीकर्मदिनेदिनांतरेवाअमुकलिंगप्रतिष्ठांगतयाचंडप्रतिष्ठां
करिष्येतिसंकल्प्यप्रासादाद्बहिःगर्भगृहार्धसूत्रांतरालेईशान्यांचस्थापने
पीठादौचंडमूर्तिंसंस्थाप्यपूजयेत्॥तत्रध्यानं॥रुद्रात्मेप्रभवंचंडंकज्जलाभंत्र

६८

६८

यानकं॥शूलदंडधरंरौद्रंचतुर्वक्त्रंचतुर्भुजं॥मुखोद्दीप्तमहाज्वालंरक्तंद्वादशलो
चनं॥जटामुकुटखंडेंदुमंडितंफणिकंकणं॥सर्पयज्ञोपवीतंचसाक्षसूत्रकम
डलुं॥श्वेतपद्मासनासीनंभक्तिप्रकाशितनाशनमिति॥एवंध्यात्वा॥ॐचंडा
सनायनमः॥ॐचंडमूर्तयेनमः॥धुनीचंडेश्वरायहुंफट्स्वाहेतिमंत्रेणावाह्य॥
ॐचंडहृदयायहुंफट्नमः॥ॐचंडशिरसेहुंफट्नमः॥ॐचंडशिखायैहुं
फट्नमः॥ॐचंडकवचायहुंफट्नमः॥ॐचंडा स्त्रायहुंफट्नमः॥करयोर ६८
न्यं॥ॐचंसद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः॥भवेभवेनातिभवेभवस्व मि

नमःसर्वभूतदमनायत्र

मांभवोद्भवायनमःहुंफट्नमः॥ॐचिंवामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमो
रुद्रायनमःकालायनमःकलविकरणायनमोबलविकरणायनमोबलायनमोबल य
प्रमथनायनमोमनोन्मनायनमः॥हुंफट्नमः॥ॐचुंअघोरेभ्योथघोरेभ्योघोर
घोरतरेभ्यः॥सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यःहुंफट्नमः॥ॐचेत
सुरूषायविद्महेमहादेवायधीमहि॥तन्नोरुद्रःप्रचोदयात्हुंफट्नमः॥ॐशौं
शानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मशि
वोमेअस्तुसदाशिवोंहुंफट्नमः॥इतिन्यासान्कृत्वाषोडशोपचारैःसंपूज्यविद्या

पयेत्॥यावत्तिष्ठतिलोकेस्मिन्देवदेवोमहेश्वरः॥तावत्कालंत्वयादेवस्थातव्यं
शिवसन्निधौइति॥ततोदिग्बलिंदत्वाभूतानिविसृजापयेत्॥यथा॥यावत्कालं
महादेवोलिंगमाश्रित्यतिष्ठति॥तावत्कालंतुरक्षार्थंयूयंतिष्ठतसर्वदा॥ततो
गुरुःकर्मज्ञोघंसंपाद्यभद्रासनेयजमानमुपवेश्यअभिषिंचेत्॥तत्रदेवस्यत्वा०॥
अथर्वणसाम्ना ग्नाभोदेवीरभिष्टयोसुरास्त्वाऽस्यादयश्वमंत्राः॥यजमानोमहाजलाशयेवभ्र ततो
यस्नानंकृत्वामंडपमागत्यगुर्वादीन्संपूज्यहिरण्यादिदक्षिणांदत्वासोपस्का ६९
रांगांचदद्यात्॥गुरुश्च॥समस्तजगदुत्पत्तिस्थितिसंग्रहकारकः॥शिवःसानुग्र

+कुर्यात्॥मंडपाकरणपक्षेकुंडस्थानेस्थंडिलंकुर्यात्+४

रस्तद्वत्सर्वदासर्व कामदस्तुतिमंत्रेणाभिषेकंदद्यात्॥यथाशक्तिब्राह्मणभोज
नं॥क्वचिच्चंडोनास्तीतित्रिविक्रमः॥बाणलिंगेचलौहेचसिद्धलिंगेस्वयंभुवि॥
प्रतिमासुचसर्वासुनचंडोधिकृतोभवेदितिचंडपूजा॥अथचलप्रतिष्ठाविधा
यनाघुक्ता॥तत्रशुचौदेशेमंडपंतदंतःप्रतीच्यामुदीच्यामीशान्यांवाकुंडं
तदुत्तरतःस्नानोपकरणानिनैर्ऋत्येवास्तुमंडलंमध्येवेद्यांसर्वतोभद्रादिमं
डलंतदुत्तरतःस्वस्तिकोपरिशय्यास्थानंचकृत्वापूर्वदिनेप्रतिष्ठादिनेवाग
णेशपूजनपुण्याहवाचनमातृकापूजनाभ्युदयिकश्राद्धंकृत्वागुरुमृत्विजश्चतुरो द्वा
+विष्णुप्रतिष्ठायांसर्वतोभद्रमंडलंशिवप्रतिष्ठायांलिंगतोभद्रं॥+२

मंडपकरणपक्षे १ वराश्वत्थापामार्ग २ च १ तत्र ग्रहस्थापने केचिदिछंति मपूर्व

वाऋत्विजोवृत्वापूजयेत्॥ततोगुरुर्मंडपप्रतिष्ठांअग्निस्थापनंकृत्वास्थाप्यदेव
तांनेवारंचरुंश्रपयित्वाज्यभागांतेपलाशे इंसमिधांप्रत्येकमष्टसहस्रमष्टश
तंवाप्रतिदेवतंलोकपालमंत्रैर्व्याहृतिर्वाजुहुयात्॥तावत्संख्याकमाज्यहोमंच
कृत्वास्थाप्यदेवताकमंत्रैएवसमित्तिलाज्याहुतीनांप्रत्यृचंदशांऽशंसहस्रम
ष्टशतंवास्थाप्यदेवतामंत्रंजपेत्॥अथयजमानोगुरवेवरंदद्यात्॥ततोगुरु
र्देवंपंचामृतैःपंचगव्यैश्चपृथक्तत्तन्मंत्रैःशन्नोदेवीरभिष्टयआपोभवंतुपीत ७०
यो॥शंयोरभिस्रवंतुनःइतिसंस्रावकलशेनचसंस्राप्यश्रीखंडाद्यैरनुलिप्य

हुतीःसिष्टकृतंचहुत्वा

स्नोदकेनप्रक्षाल्यपुनश्चतुर्भिःकलशैःसमुद्रज्येष्ठा॥याआपोदिव्या॥यासांरा
जावरुणो॥यासुरा जावरुणोयासुसोमोऽस्मायभिषेकमंत्रैश्चतुर्भिःक्रमेणाभि
षिच्यभद्रपीठेनिवेश्यअष्टकलशान्जलपूर्णान्पूर्वादिक्रमेणसंस्थाप्यसप्तमृदःप
लवान्कुशान्शुद्धोदकंप्रस्रवोदकंयवान्पुष्पाणिफलानिचक्रमेणनिक्षिप्य
स्थापनक्रमेणकुंभैःस्नापयेत्॥तत्रमंत्राः॥आपोहिष्ठामा
योभुवस्तानऊर्जेदधातन॥महेरणायचक्षसे॥योवःशिवतमोरसस्तस्यभाजयेहने
नः॥उशतीरिवमातरः॥तस्माअरंगमामवोयस्यक्षयायजिन्वथ॥आपोजनयथाच

नः॥हिरण्यवर्णाः शुचयः पावकाः यासु जातः कश्यपो यास्विंद्रः॥अग्निं यागर्भं दधिरे विरू
पास्तान आपः शं स्योना भवंतु॥यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यं
जनानां॥मधुश्चुतः शुचयो याः पावकास्तान॥यासां देवा दिवि कृण्वंति भक्षं या अंत
रिक्षे बहुधा भवंति॥याः पृथिवीं पयसोंदंति शुक्रास्तान॥अग्नेर्वेनमा च सुषाप स्यो
नापः शिवया तनुवोपस्पृशात त्वचं मे॥सुर्वाग्जग्नीरप सुषदेहवेवो मयि वर्चो बल
मोजो निधत्तेति च तुष्टयं॥पवमानः सुवर्जनः॥पवित्रेण वि चर्षणिः॥यः पोता स ७१
पुनातु मा॥पुनंतु मा देवजनाः॥पुनंतु मनवो धिया॥पुनंतु विश्व आयवः॥जातवेदः

पवित्रवत॥पवित्रेण पुनाहि मा॥शुक्रेण देव दीद्यत॥अग्ने क्रत्वा क्रतूंरनु॥यत्ते प
वित्रमर्चिषि॥अग्ने वितततमंतरा॥ब्रह्म तेन पुनीमहे॥उभाभ्यां देव सवितः॥पवित्रे
ण सवेन च॥इदं ब्रह्म पुनीमहे॥वैश्वदेवी पुनती देव्यागात॥यस्यै बह्वीस्तनुवो वी
तपृष्ठाः॥तया मदंतः सधमादेषु वयं स्याम पतयो रयीणां॥वैश्वानरो रश्मिभि
र्मा पुनातु॥वातः प्राणेनेषिरो मयोभूः॥द्यावापृथिवी पयसा पयोभिः॥ऋतावरी
यज्ञियेमा पुनीतां॥बृहद्भिः सवितस्तृभिः॥वर्षिष्ठैर्देव मन्मभिः॥अग्नेर्दक्षैः पुना
हि मा॥येन देवा अपुनत॥येनापो दिव्यं कशः॥तेन दिव्येन ब्रह्मणा॥इदं ब्रह्म पुनी

महे॥यः पावमानीरध्येति॥ऋषिभिः संभृतꣳरसं॥सर्वꣳसपूतमश्नाति॥स्वदितं मा
तरिश्वना॥पावमानीर्योऽध्येति॥ऋषिभिः संभृतꣳरसं॥तस्मै सरस्वती दुहे॥
क्षीरꣳसर्पिर्मधूदकं॥पावमानीः स्वस्ययनीः॥सुदुघा हि पयस्वतीः॥ऋषिभिः
संभृतोरसः॥ब्राह्मणेष्वमृतꣳहितं॥पावमानीर्दिशंतु नः॥इमं लोकमथोऽमुं
कामास्मर्धयंतु नः॥देवीर्देवैः समाभृताः॥पावमानीस्वस्ययनीः॥सुदुघा हि
घृतश्चुतः॥ऋषिभिः संभृतोरसः॥ब्राह्मणेष्वमृतꣳहितं॥येनदेवाः पवित्रेण॥आ
त्मानंपुनते सदा॥तेनसहस्रधारेण॥पावमान्यः पुनंतु मा॥प्राजापत्यंपवित्रं॥ ७२

तोष्णमꣳहिरण्मयं॥तेनब्रह्मविदोवयं॥पूतंब्रह्मपुनीमहे॥इंद्रः सुनीतीसहमापु
नातु॥सोमःस्वस्यावरुणःसमीच्यां॥युमोराजाप्रमुणाभिःपुनातुमा॥ज्ञातवेदा
मोर्जयंत्सापुनातु॥इत्सनुवाकश्चेतितनोवाससीपरिधाय्योपवीतंदत्वागंधपु
ष्पधूपदीपैःसंपूज्यपैष्टैरष्टभिर्दीपैर्नीराज्य॥हिरण्यगर्भसमवर्तताग्रे॥ यश्चिरापो॰ यः प्राणतो॰यस्येमे॰येनद्यौ॰यंक्रंदसी॰आपोहय॰" अष्टभिꣳहिरण्यशलाकां मंत्रैः॥
गृहीत्वा॥चित्रंदेवानामुदगादनीकं चक्षुर्मित्रस्यवरुणस्याग्नेः॥इतिअर्धचैन
देवनेत्रेउन्मील्य॥अंजंतित्वामध्वरेदेवयंतोवनस्पतेमधुनादैव्येन॥यदूर्ध्वस्ति

धूरसिसंतंजपित्वा १ मयूरव

ष्ठाद्रविणेहधत्तायदाक्षयोमातुरस्याउपस्थे॥इसंजयित्वापुनर्मधुघृतशर्करा
भिर्देवस्यत्वासवितुःप्रसवेश्विनोरिस्यँजपेत्॥मंत्रांतेअनज्मीतिवाक्य शेषः॥ तं
ततोभक्ष्यभोज्यादर्शादिश्रीघ्रंदर्शयेत्॥नदाग्रेकोपिनतिष्ठेत्॥ततोदर्भेषासी
नोदर्भान्धारयमाणःपुरुषसूक्तेनस्तुत्वावंशपात्रेपंचवर्णान्वितमंत्रंक्षिप्य
देवंनीराज्यओंनमोभूताधिपतयेदीप्तशूलधरायोमापतयेसर्वविघाधिपत
येरुद्रायनमःशिवमगर्हितंकर्मास्तुस्वाहेतिबलिंदत्वाचामेत्॥ततोमंडलदेवता ७३
आवाह्यगंधादिनासंपूज्यस्थाप्यदेवंतत लिंगमंत्रैरावाह्यकर्णिकायांप्रतिष्ठा

ब्रह्मणाःसर्वतोभद्र२

---

२ यबुद्धितत्वायअहंकारतत्वायमनस्तत्वायशब्दतत्वायेतिशिरसि॥स्पर्शतत्वायेतित्वचि
रूपतत्वायेति२

कुंडे यगंधाद्यैःसंपूज्यमंडलदेवतानाममंत्रैर्दशदशतिलहुतीर्हुत्वाराज्यायांदेव
मारोप्यपुरुषसूक्तोत्तरनारायणाभ्यांब्रालयैःसहोपतिष्ठेत्॥ततोदेवेपुरु
षात्मनेनमः॥प्राणात्मनेनमइतिशरीरेव्यापकंन्यसेत्॥प्रकृतितत्वाय हृ
दि॥रसतत्वायबस्तौ॥गंधतत्वायपादयोः॥श्रोत्रतत्वायकर्णयोः॥त्वक्तत
त्वायसर्वशरीरे॥चक्षुस्तत्वायचक्षुषोः॥जिह्वातत्वायजिह्वायां॥घ्राणतत्वा
यघ्राणे॥वाक्तत्वायवाचि॥पादतत्वायपादयोः॥पाणितत्वायपाण्योः॥पा
युतत्वायपायौ॥उपस्थतत्वायोपस्थे॥पृथिवीतत्वायपादयोः॥आपतत्वाय

मयूख

वस्रो॥ तेजस्त्वा
यहृदि॥वायुस्त्वायघ्राणे॥आकाशस्त्वायशिरसि॥रजस्त्वायतमस्त्वायस
त्वतत्त्वायदेहतत्त्वायेतिदेहे॥ततोपिपुरुषसूक्तन्यासंकृत्वापूज्याधिवासयेत्॥ततो सं
मंडलस्यपश्चिमेनगंतव्यंमंडलदेवतानामुपहारनिवेदनं॥तत्रसर्वान्ब्रह्मणे
आ घृतंनंसोदकमिंद्रायौज्यान्नमग्नयेमाषांनंयमाय॥कृसरान्नैर्ऋत मा
येनवनीतोदनंवरुणाय॥पयोदनंवायवे॥प्रेष्यंगवंसोमाय॥गौधूकमीशा ७४
नाय॥पायसंसर्वेभ्यः॥ततःशय्याप्रदेशेनैवारंचरुंस्थापयित्वातेनदिग्बलिंदत्वा
वा वे२

निशांनयेदितिअधिवासनं॥प्रातःपुरोदयादेवमु त्थाप्यमूलमंत्रेणोपस्थायघृतेन
चरुंश्रपयित्वाभिघार्यमूलमंत्रेणाष्टोत्तरसहस्रमष्टोत्तरशतंवाहुत्वाघृतंतावद्
वरुणोषेण सोमाय०॥ हुत्वाॐअग्नयेस्वाहाॐधन्वंतरयेस्वाहाॐअनुमत्येस्वाहा॥प्रजापतयेस्वाहा॥प कुह्वैस्वाहा
रमेष्ठिनेस्वाहा॥ब्रह्मणेस्वाहा॥अग्नयेस्वाहा॥सोमायस्वाहा॥अग्नयेरौद्राय रुद्राय
स्वाहा॥अग्नयेन्नपतयेस्वाहा॥प्रजापतयेस्वाहा॥विश्वेभ्योदेवेभ्यःस्वाहा॥सर्वी
भ्योदेवताभ्यःस्वाहा॥ सर्वेभ्योभूतेभ्यःस्वाहा॥भूर्भुवःस्वःस्वाहा॥अग्नयेस्विष्टकृ
तेस्वाहेतिजुहुयात्॥ततोयजमानोगुरवेवरंदद्यात्॥ततोऽहिनेसूर्येगुरुर्वेयोवासा
मे१

मिमुखंदेवंकृत्वारत्नपुष्पफलमूलौषध्यादिदर्शयित्वाताम्रपात्रेशांतिंजलमादाय
मूलमंत्रेणशतवारमभिमंत्र्यदेवशिरसिआसिंचेत्तिष्ठब्रह्मणस्पतेदेवयंतस्त्वमेव
उपप्रयंतुमरुतःसुदानवइंद्रप्राशूर्भवासचोदयुथाप्विश्वतश्चक्षुरुतविश्वतोमुख
विश्वतोबाहुरुतविश्वतस्पात्।।संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयंदेवएक
कः।।इयुपस्थायदेवस्यपुरस्तात्।।ॐब्रह्मविष्णुरुद्रेभ्योनमः।।दिक्पालेभ्योनमः।।
वसुभ्योनमः।।रुद्रेभ्योनमः।।आदित्येभ्योनमः।।अश्विभ्यांनमः।।मरुद्भ्योनमः।।कुबेर
यनमः।।गंगादिमहानदीभ्योनमः।।अग्नीषोमाभ्यांनमः।।इंद्राग्निभ्यांनमः।।द्यावाप

प्राणप्रतिष्ठांकुर्यात्।।२

थिवीभ्यांनमः।।धन्वंतरयेनमः।।सर्वेभ्योनमः।।विश्वेभ्योदेवेभ्योनमः।।ब्रह्मणेन
मइतिजप्त्वादेवस्यपुरतोयजमानमभिषिंच्यदेवमंत्रंजपित्वाध्रुवसूक्तेनतल्लिंग
मंत्रेणपुरुषसूक्तेनगायत्र्याव्याहृतिभिर्देवंप्रतिष्ठाप्यप्रतिमायांनिजबाहुनायुध
परिवारादिकंध्यात्वापुनःपूजयित्वामुद्रांप्रदर्श्यमूलमंत्रमष्टोत्तरशतंजपित्वासु
स्नानवाचम्यस्विष्टकृदादिउत्तरांगानिसमापयेत्।।ततोयजमानोदक्षिणांदद्या
त्।विप्रांश्चभोजयेद्यथाशक्ति।।इतिचलार्चाप्रतिष्ठा।। ।।अथजीर्णोद्धारविधिः
।।अग्निपुराणे।।जीर्णादीनांचलिंगानांउद्धारविधिमावदेत्।।लक्ष्मोस्तिंतंचभ

प्रतिष्ठा० ७६

ग्नंचस्थूलंवज्रहतंतथा॥संपुटंस्फुटितंव्यंगंलिंगमित्येवमादिकं॥इत्यादिदुष्ट
लिंगानांत्याज्यापिंडीतथावृषः॥लक्ष्मोस्थितंबाणादिभ्रमेणतद्विधिनास्थापि
तंसलक्षणरहितंभग्नमनेकशकलीभूतं॥स्थूलंपिंडिकानुरूपं॥वज्रहतंवि
घुट्टतं॥स्फुटितमेकदेशेभग्नं॥व्यंगंपिंडिकाप्रणाल्यादिरहितं॥पिंडीवृषयोर्दु
ष्टेतयोरेवसागोनलिंगस्य॥चालितंचलितंनिम्नमस्यर्थंविषमस्थितं॥दिग्भूदं
पतितंलिंगंमध्यस्थंपतितंतथा॥एवंविधंचसंस्थाप्यनिर्व्रणंचभवेद्यदि॥ना
देहेनप्रवाहेणतदपाक्रियतेयदि॥ततोन्यत्रापिसंस्थाप्यंविधिदृष्टेनकर्मणेति

संपुटंस्फुटी
तं।

येन

७६

विषमस्थितंयत्रपूजादिकर्तुंनशक्यतेतस्मिन्देशेव्यवस्थितं॥१

॥निम्नंसामंतभूभागान्निम्नायांभूव्यवस्थितं॥दिग्भूदंविशेषविध्यभावेपिउद
गतिरिक्तदिक्प्रणालीकं॥पतितंगर्तारोहमध्यस्थंसंपूर्णपिंडिकाश्वभ्रेतर्गतं॥
प्रासादमध्यभागेस्थितमिसपिकेचित्॥एवंविधमिसनेनलक्ष्मोस्थितायति
रिक्तानामेवोपलक्षकः॥पीठाच्चचालितंलिंगंनिर्दोषंतुभवेद्यदि॥ततोपिस्था
पयेत्तत्रजपेल्लक्षमघोरकं॥सजेत्सदोषितंलिंगंश्वपचाद्यैश्चसेवितं॥लिंगांत
रंप्रतिष्ठाप्यविशुद्धिमधिगच्छतीतिसिद्धांतरोरवरोक्तेः॥तत्रैव॥लिंगादीनांच
जीर्णानांप्रोच्यतेविधिरुच्छ्रितौ॥सर्वारिष्टविनाशार्थंसर्वप्राणिहितार्थकः॥लिं
गलक्ष्मोस्थितभग्नस्फुटितविघुट्टतानिरिक्तानांग्रहणं।तेनजघन्योनिर्व्रणशब्दोपि

गस्यपिंडिकायाश्चप्रतिमामुखलिंगयोः॥सर्वेषांपरिवाराणांहर्म्यप्राकारयोस्त
था॥उद्धारश्चावृतिःप्रोक्तायोद्धारेहेतुरुच्यते॥आवृत्तिःपुनःसंस्कारः॥स्फुटि
तेरवंडितेभग्नेदग्धेवाशनिनाग्निना॥उन्मत्तैःशत्रुभिश्चोरैःकरिणास्रोतसाहृ
ते॥लिंगेपीठादिकेवापिविशीर्णेकालपर्ययात्॥देहंजीर्णंयथादेहीसत्कान्यदुप
गच्छति॥लिंगादीन्यतिजीर्णानितथामुंचंतिदेवताः॥खंडितंचूर्णितंलिंगं
नेतायाअश्रयंतिच॥लिंगाद्यंसत्प्रशस्यत्वात्तथाचब्रह्मराक्षसाः॥कर्तुर्नृपाणां
राष्ट्रस्यतत्ग्रामस्यविशेषतः॥पीडांकुर्वंति तेषुग्रांदुर्भिक्षंरैणादिकं॥तस्मा

सर्वप्रयत्नेनकुर्याद्धरणक्रियां॥स्वायंभुवेचरदेवेचबाणलिंगेतथैवच॥ऋषि
भिश्चासुरैर्दैवैस्तत्तद्विद्भिःप्रतिष्ठि तेषु॥लिंगेजीर्णादिदुष्टेपिनोद्धारंतत्रकार
येत्॥इदमपिस्वयंभुवादिव्यतिरिक्तविषयं॥ननुदेवात्तव्यक्तिनाशेनतत्स्था
नस्थापितेतरानीतनतादृग्व्यक्तिविषयं॥स्वायंभुवादिलिंगानांजीर्णपीठं
परिसजेत्॥दिव्यूखंपतितंस्थानंमध्यस्थंस्रोतसाहृतं॥चोरादैश्चालितंलिं
गंस्थापयेन्निर्व्रणंपुनः॥लोहादिछिन्नभिन्नांगंसंधायस्थापयेत्पुनः॥सुवर्ण
घटलोहनिर्मितंलिंगंदैवाद्भग्नंसत्तदेवसज्जंकृत्वापुनःस्थापयेदित्यर्थः॥बा

हुपादशिरोहीनांकर्णनासास्यहीनकां॥तादृशींपरिवाराणांप्रतिमांपरिवर्ज
येत्॥यद्द्रव्यंयत्प्रमाणंचलिंगंवाप्रतिमापिवा॥तादृक्तेनैवमानेननद्रव्येण त्
प्रकल्पयेत्॥कारयेन्नान्यमानेननान्यद्रव्येणवापुनः॥नान्याकारंचनान्यत्र
स्थापयेत्तद्गुरूत्तमः॥स्रोतसापहृतेलिंगेप्रासादेवातदन्यतः॥तत्समीपग
तेदेशेस्थापयेद्बाधवर्जिते॥प्रासादेपतितेहर्म्यगोपुरेमंडपादिके॥तदाका
रंचतेद्रव्यैस्तन्मानंतत्रकारयेत्॥कर्मयोग्याश्मिलाग्राह्यादृढकाश्चतथाविधाः॥ ७८
हीनद्रव्यंकृतंहर्म्यंश्रेष्ठैर्द्रव्यैःसमाचरेत्॥हीनंवाप्यधिकंमानमाकारंवानकारये

त्॥एवमुक्तेनमार्गेणदोषैरन्यैर्विचार्यच॥लिंगपीठादिकंजीर्णंतदुद्धारंतथा
चरेत्॥तिथिनक्षत्रवारादितदर्थेनविचारयेत्॥जीर्णंचोद्धारयेद्दिद्वा नजीर्णं
नैवचालयेत्॥जीर्णस्यधारणेदोषोऽजीर्णचलनेतथा॥तस्मान्नधारयेज्जीर्ण
मजीर्णंरक्षयेद्बुधः॥सुस्थितंदुस्थितंवापिशिवलिंगंनचालयेत्॥स्रोतेनस्थाप
नंकुर्यात्सहस्रेणतुचालयेत्॥अस्यश्लोकस्यवाक्यार्थोवर्ण्यतेथ यथागमं॥नि
त्यंपूजादिभिर्युक्तंजीर्णंचमपिसुस्थितं॥हीनंपूजादिभिर्लिंगंअजीर्णमपिदु
स्थितं॥देवतास्थापितंलिंगं प्रोहोन्मत्तमागतं॥तल्लिंगंदुस्थितंवापितंत्रस्तैरि

तिनिश्चितं॥सहस्रादिकहोमेनतस्यचालनमीरितं॥स्थापनंशतहोमेनतस्य
लिंगस्यचोदितं॥एवंबहुविधैस्तंत्रैर्दोषाश्चबहुचोदिताः॥परीक्ष्यबहुधातांश्च
जीर्णलिंगंसमुद्धरेत्॥हयशीर्षागमेपि॥जीर्णोद्धारविधिंवक्ष्येसंक्षेपेणब्रह्म
वीमिते॥चालितोत्पाटिताभूमिःकेनचित्सापकर्मणा॥चंडालैस्संस्पर्शैर्विकृ व
तादूषितात्वया॥स्वयमापतितात्जीर्णानदीवेगादिपातितात्॥अपुण्यजलसंस्प
र्शाविप्रक्षत्तजदूषितात्॥पतितार्चितात्श्लेष्मविण्मूत्रादिविदूषितात्॥सव्रण ७९
लक्षणोपेतासंस्कार्यादेशिकेनतु॥भूमिलिंगमीश्वरप्रतिमाचेचांडालव

तीतस्पृष्टा॥असंस्पर्शैर्निषिद्धस्पर्शैः॥जीर्णकालबाहुल्येनक्षारादिसंबं
धेनेवविशीर्णा॥सव्रणाएकदेशेभग्ना॥देशिकउपासकः॥पूर्वोक्तेनविधा
नेनवेदिकेनसुरोत्तम॥अचलांदूषितामेवंस्थापयेद्विधिनोद्धृतां॥पूर्वोक्ते
नचलार्चाप्रतिष्ठाप्रकारेण॥एवंविधिनोद्धृतापीत्यन्वयः॥वक्ष्यमाणप्रका
रेणोद्धृतामित्यर्थः॥पूर्वपीठंपरित्यज्यदन्यदपितद्धृतं॥ततोयथोक्तविधि
नाप्रासादेसंनिवेशयेत्॥दुष्टंपूर्वासनंपरित्यज्यअन्यस्मिंस्तत्प्रासादगतेआ
सनेयथोक्तेनाचलार्चाप्रतिष्ठाप्रकारेणपुनःस्थापयेदित्यर्थः॥अतिजीर्णतया

व्यंगांदारवींश्चैलजामपि॥परित्यजन्यसेदन्यांपूर्वोक्तविधिनागुरुः॥संहारवि
धिनातन्त्रमंत्रान्संहृत्य देशिकः॥सहस्रंनारसिंहेनहुत्वातामुद्धरेद्गुरुः॥संह
रविधिंप्रातिलोम्यैर्मंत्रानूकलाः॥संहृत्योद्धृत्यनारसिंहेनन्नसिंहमंत्रेण॥होम
द्रव्यमाज्यमन्यान्ना देन्नात्॥वषंसंयोज्यपित्वातुमंत्रेणोद्धृत्यदेशिकः॥दार
वींदारुयेद्वन्नेत्रैलजांप्रक्षिपेद्गुले॥धातुजांरत्नजांवापिप्रक्षिपेन्मकरालये॥
अगाधेवान्यतोयेचक्षिपेन्नद्यांमहाजले॥वषंवषोवार ज्वासंयोज्यमंत्रेण ८०
पाशुपतेनोद्धृयेदितिविक्रमः॥यानमारोप्यजीर्णोद्धारेछायवस्त्रादिनागुरुः॥

शंखदुंदुभिनिर्घोषैर्गीतवादित्रनिस्वनैः॥नीत्वागाधंजलंरम्यंभागीरथ्यामथार्ण
वे॥विषक्सेनायवीर्येणप्रक्षिपेत्तांततोगुरुः॥यानमारोप्यसादिपूर्वोक्तएवप्रति
पादनप्रतिकर्तव्यतोक्त्यर्थं॥विषक्सेनोदेवेनवीर्येणबीजेनगुरुर्भागीरथ्यादिज
लेतांप्रतिमांक्षिपेदितिसूत्रार्थः॥रत्नानि क्षिप्तान्यादायस्वयंदद्यात्तुदक्षिणां॥धेन
वोदशवापंचस्वर्णवस्त्रादयश्चताः॥जीर्णोद्धारेप्रदातव्यागुरवेविष्णुतुष्टये॥क्षि
प्तांतर्निक्षिप्तरत्नान्यादायस्वयंयजमानोदशधेनूःपंचवाहेमवस्त्रादयश्चता
गुरवेदक्षिणांदद्यादितिसूत्रार्थः॥भोजनीयाविष्णुभक्तादेयमंनवारितंत्रिरात्रमुत्सवः

कार्यःपंचसप्तमथापिवा॥बलिंविधिनादेयोयथोक्तेनचलार्चाप्रतिष्ठोक्तप्रकारे
ण॥ततोनिवेदयेदन्यांप्रतिमांलक्षणान्वितां॥निवेदयेत्स्थापयेत्॥तत्स्थापनेदेवरा
जेंद्रतस्यदोषस्यशांतये॥संपत्तिर्वाविपत्तिर्वानोपेक्षांतत्रकारयेत्॥अपास्यपि
ंडिकांपूर्वोंअन्यांतत्रनिवेशयेत्॥यद्द्व्यायत्समाणाचयामूर्तिश्चोद्धताहरेः॥तद्ध्या
तत्समाणाचसामूर्तिस्तत्रकीर्तिता॥यत्समाणंयदाकारंयन्मयंबिंबमुद्धरेत्॥
तत्समाणंतदाकारंतन्मानंतत्रविन्यसेत्॥विहायपिंडिकांपूर्वांतद्दिनेचापरान्य ८१
सेत्॥द्वितीयेवातृतीयेवादिवसेस्थापयेद्धरिं॥अतऊर्ध्वंभवेद्दोषोविधिनापिनि

वेशिते॥अनेनैवविधानेनलेप्यादौस्तुविसर्जयेत्॥कुड्यलिखिताःप्रतिष्ठापि
ताःप्रतिमालेप्याः॥अन्यद्विकल्पयेत्तत्रतत्समाणंतदाचरेत्॥एषसंक्षेपतःप्रो
क्तोजीर्णोद्धारविधिस्तव॥सर्वेषामेवदेवानामेषसाधारणःस्मृतः॥योजीर्णवि
धिनाबिंबंसंस्कुर्यान्मानवोभुवि॥पुण्यंशतगुणंतस्यमूलान्नास्त्यत्रसंशयः॥व
पीकूपतडागानांसुरधाम्नांसदनघ॥प्रतिमानांसमानांचसंस्कर्तायोनरोभुवि॥
पुण्यंशतगुणंतस्यभवेन्मूलान्नसंशयः॥संशयोत्रनकर्तव्योजीर्णसंस्कारकर्म
णि॥मूलाद्दशगुणंप्रोक्तंपुण्यंकूपेप्रतिष्ठितं॥प्रतिष्ठितेभावे कः॥प्रतिमायांश्र

मिति १

शतगुणं२

तगुणंकूपादेःपरिकीर्तितं॥प्रतिमायेदशगुणंजीर्णसंस्कारणात्भवेत्॥कूप
प्रतिमयोर्दशगुणयोरल्पमहत्वापेक्षयाव्यवस्था॥अग्निपुराणे॥सुस्थितंदु
स्थितंवापिशिवलिंगंनचालयेत्॥शतेनस्थापनंकुर्यात्सहस्रेणतुचालनं॥
पि पूजादिभिश्चसंयुक्तंजीर्णोद्धर्मसुस्थितं॥पूजयारहितंयत्तद्दुष्टमपिदुःस्थितं॥
अयंचचालननिषेधोविधिव्यतिरेकेण॥शतसहस्रसंख्येनुक्तंयत्तद्धोमगते॥ संख्ये
गोश्वाश्वश्वेतत्रैवबहूपकारित्वाद्यः सहस्रंशताश्वमित्यादौबाहुल्येनदर्श ८२
नाच्चेतिन्यायविदः॥सिद्धांतशेखरेतुहोमगतेयंसंख्येयुक्तं॥यदपितत्रैव॥अ

तुदेवान्नशक्तिनाशेननत्स्थानस्थापितेदानींतननतादृशव्यक्तिविषयं॥२

सुरैर्मुनिभिर्वैस्तत्तद्विधिप्रतिष्ठितं॥जीर्णंवाप्यथवाभग्नंविधिनापिनचालये
विषयं॥ त्॥इतितदसुरादिप्रतिष्ठापितैतव्यक्तिविषयं॥जीर्णोद्धारप्रकारोप्यत्रैव॥या
म्येमंडपमीशेवाप्रसक्तद्वारेकतोरणं॥विधायद्वारपूजादिस्कंडिलेसंप्रपूजनं॥
कुंभ द्वारपूजादिशिवैपूजांतमितिनिर्विक्रमः॥मंत्रान्संतर्प्यसंपूज्यवास्तुदेवांस्तुपू
र्ववत्॥दिक्बलिंचबहिर्दत्वासमाचम्यस्वयंगुरुः॥ब्राह्मणान्भोजयित्वातुशांभु
विंतापयेत्ततः॥दुष्टलिंगमिदंशेषशांतिरुद्धरणस्यचेत्॥तच्चित्तवासूत्रविधि
नाऽधितिष्ठचमांशिव॥एवंविंतापयेदेवंशांतिहोमंसमाचरेत्॥मध्याह्नसं

रदूर्वाभिर्मूलेनाष्टोत्तरंशतं॥ततोलिंगंसंस्थाप्यपूजयेत्स्थंडिलेतथा॥लिंगंलिंगाधि
ष्ठितंदेवतांस्थंडिलेस्थाप्येत्यर्थः॥ॐव्यापकेश्वरायेतिनाम्नानेनशिवार्चनं॥
ॐव्यापकेश्वरहृदयायनमः॥ॐव्यापकेश्वरशिरसेनमः॥ॐव्यापकेश्वरशि
खायेनम रसाचूर्यरसंगमंत्राः॥ततस्तत्राग्नितंमंत्रंवारयेदस्त्रबंधतः॥
सलक्कोपीहयःकश्चित्लिंगमाश्रियतिष्ठति॥लिंगंसत्कारशिवाज्ञाभिर्यत्रेष्टं
तत्रगछतु॥विद्याविघ्नेश्वरैःशंभुःशंभुरत्रभविष्यति॥सहस्रंप्रतिभागंचततः ८३
पाशुपतास्त्रेण॥हुत्वाशांसंबुनाप्रोक्ष्यंस्पृष्ट्वा जपेत्ततः॥ब्रह्मशिलापिंडि

कुशैः१

लिंगात्मकदेव तामागत्रयसंस्कारार्थंपाशुपतास्त्रेणहुत्वाशांतिकलशोदकेनदे
वंसंप्रोक्ष्यकुशैःस्पृष्ट्वाहोमसंख्ययापाशुपतमंत्रंजपेत्॥दत्वार्घ्यंचविलोमेनतत्त
तत्वाधिपांस्ततः॥मूर्तिमूर्तीश्वरौलिंगेपिंडिकासंस्थितान्गुरुः॥विसृज्यस्व
र्णपात्रेनवस्कंधस्थयातथा॥रज्जावध्वातयामीलाशैवमंत्रंगणनाथेनः॥
तज्जलेनिक्षिपेन्मंत्रीपुष्पार्थंजुहुयाछतं॥तत्पयेदिकूपतीनांचवास्तुशुद्धेशतं
शतं॥रक्षांविधायतद्भूमि महापाशुपतास्त्रतः॥लिंगमन्यत्ततस्तत्रस्थापयेद्वि
धिवद्गुरुः॥विलोमेपराशुखसंस्थकं॥तत्तत्वाधिपमूर्तिमूर्तीश्वरावस्थंते॥सि

द्वांतशोरवरे॥जीर्णोद्धारविधिंवक्ष्येसमासात्तत्रचोदितं॥ईशान्यांदक्षिणेवापि
मंडपंपश्चिममुखं॥कुर्वीतपूर्ववत्सर्वंएकास्यंचैकतोरणं॥पूर्ववत्सर्वसंभारि॥
द्वारपालार्चनंकुर्यात्स्थंडिलेग्नौशिवार्चनं॥मंडपप्रतिष्ठाप्रकारेण॥मंत्राणांतर्प
णंकुर्याद्वास्तुदेवार्चनंतथा॥मंत्राणांदेवस्थापितकलानां॥अंतर्बहिर्बलिंदद्या
च्छिवभक्तांश्चभोजयेत्॥शिवभक्तान्पंचेति त्रिविक्रमः॥ब्रह्मा
न्कर्मकरादींश्चततोविसृजेच्छिवं॥दोषेलिंगमिदंदुष्टंशांतिरस्यस्यचोद्धृतौ॥ ८४
तस्मादेवंविधानेनमाधितिष्ठमहेश्वर॥भवल्लितिवचस्तेनप्रोक्तंतद्भावयेद्गुरुः

॥तेनशिवेनप्रोक्तंशांतिर्भवल्लितिवचोगुरुर्भावयेत्॥विसृष्टेवंशिवंभक्त्याशां
तिहोमंसमाचरेत्॥मधुनाज्येनदुग्धेनदूर्वाभिर्मूलमंत्रतः॥शतमष्टाधिकंमंत्रं
येकंजुहुयात्ततः॥मूलमंत्रमुच्चार्यसर्वं॥त्रिभिश्चमधुरैःसार्धंसमिधोघोरमं
त्रतः॥शांत्यर्थंवर्तुलेकुंडेसहस्रंजुहुयाद्गुरुः॥अथवास्रुवेणजुहुयाद्व्याहृतीभि
श्चपूर्णया॥ब्रह्मीयालंकलंहेमंलिंगस्योत्तानकेकरे॥लिंगस्योत्तानंकरंभा
वयित्वातत्रहेमंकलंबह्मीयादित्यर्थः॥लिंगंसंस्थाप्यसंपूज्यपूर्वोक्तविधिना
ततः॥सांगंसंपूजयेद्भक्त्यास्थंडिलेव्यापकेश्वरं॥लिंगाश्रितानिभूतानिताद्

येदस्त्रमंत्रतः॥यानिकानिचभूतानिनिष्ठंत्याश्रित्यलिंगकं॥त्यक्त्वाशिवालयंतानि
व्रजंतुस्थानमीप्सितं॥विद्याविद्येश्वरैर्युक्तंशिवेलिंगेभविष्यति॥इतिदत्वाग्नि
वस्यात्ततोभौत्रयेगुरुः॥हुत्वाहुत्वास्त्रमंत्रेणतथापाशुपतास्त्रतः॥प्रतिभा
गंसहस्रंचसिंचेच्छांतिघटोदकैः॥ब्रह्मशिलापिंडिलिंगात्मकदेवभागत्रयंसंस्
र्तुंत्रिसहस्रमस्त्रेणहुत्वातेनैवप्रतिभागंकलशसहस्रेणाभिषिंचेदित्यर्थः॥मू
लमध्याग्रकैर्दर्भैःस्पृष्ट्वाजपमाचरेत्॥ब्रह्मशिलांमूलेनपिंडीमध्येनलिंगमथे ८५
णदर्भैःस्पृष्टार्थः॥प्राग्वत्पाशुपतास्त्रंचप्रजपेद्धोमसंख्यया॥सद्योजातादिव

क्षेषुदद्यादर्घ्यंपराङ्मुखं॥दुष्टलिंगप्रतिपत्तिमाह॥सोधंभूमौपरित्यज्यदारुजंचा
ग्निनादहेत्॥सौधंसुधानिर्मितंलिंगं॥लोहजंतेनकार्यंस्याच्छैलजंचासुनिक्षिपे
त्॥सुवर्णाद्यष्टलोहनिर्मितंभग्नंचेत्तेनैवसुवर्णादिनातत्कार्यमित्यर्थः॥तत्र
तत्रेश्वरांलिंगामूर्तिं मूर्तीश्चिरानपि॥लिंगस्थान्विसृजेन्मंत्रीपीठब्रह्मशिलाग
तान्॥वृषस्थान्विजेत्तद्वदंगमूर्तिस्थितानपि॥ततःसुवर्णपात्रेनरज्वागोचर्मज
तया॥वृषस्कंधस्थयाबध्वालिंगंपीठंचचर्मणा॥शिवमस्त्रेतिनद्वाग्नेसज्ज्नो
याहरेद्गुरुः॥उद्धारार्थंचलिंगस्यतोवृषौप्रेरयेत्ततः॥वहिर्नीत्वाततोलिंगंपीठंब्र

सशिलावटंरथादिकंसमारोप्यसमुद्रेनिक्षिपेत्ततः॥स्थूललिंगोद्धतोबध्वाग
जंवाप्रेरयेद्गुरुः॥सोधंभूमौपरित्यज्यदारुजंचानलेदहेत्॥सर्ववानिक्षिपेत्तोये
लिंगंवाप्रतिदिकं॥ततःपाशुपतास्त्रेणशांत्यर्थंजुहुयाच्छतं॥लोकपालाभित
दृष्ट्वासुशांत्यैशांतंशांतं॥प्रतिदेवतंजुहुयादित्यर्थः॥रक्षांकुर्याच्चतद्धर्म्यंमहापा
शुपतास्त्रेणा॥ततन्मयंलिंगंतत्रसंस्थापयेत्सुनः॥प्रतिष्ठोक्तेनमार्गेणसर्वकर्मस
माचरेत्॥हर्म्यस्यपरिवाराणांप्राकारादेःसमुद्धतौ॥सर्वेषामपिजीर्णानांए
षएवविधिःस्मृतः॥कर्तात्रदक्षिणांदद्याद्गुर्वादिभ्योयथोदितां॥यत्पुण्यंस्थाप

नेप्रोक्तंतत्फलं चतदुद्धतौ॥अयमत्रनिर्गलितोर्थः॥लक्ष्मो ल्लितस्फुटितवि
शीर्णश्वपचसेवितानांलिंगानांतादृशीनांबहुपादशिरःकर्णनासास्यहीना
नांप्रतिमानांचविधुनप्रकारेणचालनंजलादौप्रतिपादनंचकृत्वानूतनप्र
कारेणतस्मिन्नेवस्थानेपूर्वसजातीयद्रव्यनिर्मितंतन्मानंतदाकारंलिंगंता
दृशींप्रतिमांचस्थापयेत्॥अतिजीर्णमितिपूर्वोक्तद्वयशीर्षवाक्यात्॥पी
ठाच्चचालितंलिंगमिति॥सजेत्सदोषितंलिंगंइतिबाहुपादशिरोहीनाना
मिति॥यद्द्रव्यंयत्समाणंचेतिसिद्धांतशेखरोक्तेः॥अस्मादेववाक्य निचया

८७ स्नपनप्रतिपत्तिप्रयोजकदोषाभावाच्च सुस्नानिम्नविषमस्थदिग्मूढानांचवेधंचाल
नंतेषामेवपुनःस्थापनंच॥भग्नचूर्णितोस्तदपवादानांप्रतिपादनपूर्वकंनूत
नानांस्थापनं॥अनेकशकलत्वेनचूर्णितेनचोद्धारपुनःस्थापनविध्योरप्र न
वृत्तेः॥चलितचलित पतितमध्यस्थानांतुनोद्धारोनचत्यागः॥किंतुतेषामेव
पुनःस्थापनंउद्धृतस्योद्धारासंभवान्निर्दुष्टत्वेनप्रतिपत्तिविधिप्रवृत्तेश्च॥एते
नैवनदीवेगोन्मत्तशत्रुचोरहस्ताद्यपहृतौलाभेतान्येवपुनःस्थापनीयानि॥ ८७
तेषां अलाभेतुतादृशान्यन्यानिस्थाप्यानि॥निषिद्धस्पर्शदूषित निषिद्धजलस्पृष्टवि
नां

प्रक्षालजदूषितपतितार्चितश्लेष्मविण्मूत्रादिदूषितानांस्वस्थानस्थितानामे
वपुनःसंस्कारोनोद्धारोनापिप्रतिपत्तिः॥अतिजीर्णमितिपीठाच्चचालितामि
ति॥सजैस्सदोषितंलिंगमितिपूर्वोक्तादाक्यनिश्चयात्॥अनुद्धृतानामेवतत्रैव
संस्कारसंभवात्॥स्थलांतरनयनविधानाभावाच्च॥एतेनस्वस्थानाद चलित
च स्यविकृतस्यैविशुद्धतदग्धादेरप्येवमेवव्यवस्थाचलितस्यपुनस्तत्रैवप्रतिष्ठा॥ स्थाना
स्थानांतरविधानाभावाच्चलितस्य विकृतस्यचत्यागस्तादृशस्यान्यैप्रतिष्ठाच॥ स्य
स्थूलेपूर्वपिं ईष्टकशिलाद्युद्धारःप्रतिपत्तिर्विधिनापिंडिकांतरादिनिवेशश्च॥यं

पूर्वपीठंपरित्यज्येतिहयशीर्षवाक्याच्च॥३

गेतुपूर्वपिंडिकादीनांभग्नलेएवमेव॥पिंडिकायभावेतुपिंडिकायंतरस्थापन
मात्रमित्यादिदुष्टलिंगानामित्यग्निपुराणवाक्यालिंगेपीठादिकेवापीतिसिद्धं
तत्रेश्वरवाक्यात्तौसुवर्णादिनिर्मितभंगादौतुतेनैवसुवर्णादिनातादृशंतावत्
स्थिरमाणंचलिंगादिरक्षित्वातत्रैवपुनःस्थाप्यं॥यदितेनसुवर्णादिनातादृशंक
र्तुंनशक्यतेतदासमुद्रेनिक्षिपेत्॥रत्नजातुसमुद्रेएवक्षेप्तव्या॥रत्नजायदिदग्धा
पिस्वकांतिंनजहातितदासैवस्थाप्येतिनिश्चिक्रमः॥लोहायंछिन्नभिन्नांगंहतिसि
द्धांतशेश्वरवाक्यात्॥धातुजांरत्नजांवा पीतिहयशीर्षवाक्यात्॥इतिजीर्णोद्धार

विधिः॥ ॥अथास्यप्रयोगः॥ ॥यजमानःउद्धार्यादक्षिणस्यामीशान्यांवापश्चि
मद्वारेकतोरणंमंडपंतन्मध्यभागेवेदिंपूर्वभागेवर्तुलंचतुरस्रंवाकुंडंस्थंडिलंवा
पश्चिमेवासुपीठमुत्तरेवालुकयास्थंडिलंकृत्वाकालादिस्रक्त्वामोलफलाष्ट
गुणफलकामोल्यप्रतिमायांतुदशगुणफलकामोवाजीर्णादिदोषदुष्ट स्यलिं
गस्यप्रतिमायावाउद्धारणमुत्सृष्टणंवाकरिष्यतिसंकल्पयेत्॥पिंडिकावषगर्त
इ प्रासादकलशेषुतुरीश्वरप्रीतिकामैविशेषः॥सर्वत्रेश्वरप्रीतिकामोवा॥त
तोगणेशपूजास्वस्तिवाचनमातृकापूजनांदीश्राद्धानिकृत्वाप्रतिष्ठावत्कृत्वातद

इति

देवलाचार्यसदस्यान्हात्रिंशत्संख्योऽग्नीष्टोऽग्निजोद्धारपालांश्चाष्टौचतुरोवाच
त्वावस्त्रालंकारमधुपर्कादिभिस्तान्पूजयेत्॥आचार्योमंडपपूजादिशिवकुंभ
पूजांतंकृत्वावास्तुमंडलेमहावेद्यांचदेवतास्थापनंकृत्वापीठादौप्रणवमा
सनंदत्त्वाॐव्यापकेश्वरायएह्येहिनमः॥ॐव्यापकेश्वरायहृदयायनमः॥
ॐव्यापकेश्वरशिरसेस्वाहा॥ॐव्यापकेश्वरशिखायैवौषट्॥ॐव्यापके
श्वरकवचायहुं॥ॐव्यापकेश्वरनेत्रत्रयायवषट्॥ॐव्यापकेश्वरअस्त्रा
यफट्॥इतिमंत्रैःशिवमर्चयेत्॥देवतांतरोद्धारेमूलमंत्रेणशिवमर्चयेत्॥

ततोग्निंसंस्थाप्यलिंगचालनार्थंमूलमंत्रेणतिलाहुतिसहस्रंहुत्वामंडलदेवता
होमंपूर्णाहुतिंचकृत्वा॥जीर्णभग्नमिदंदेवसर्वदोषावहंनृणां॥अस्योद्धारे
कृतेशांतिःशास्त्रेस्मिन्कथितात्वया॥जीर्णोद्धारविधानंचनरराष्ट्रविवर्धनं॥
तदत्राधिष्ठितादेवप्रोद्धरामितवानघेति॥देवस्यजीर्णदोषंश्रावयित्वाशि
शिवं स्यिुतःसांगंविसृज्ययजमानस्यसोवर्णंकंकणंबध्वासोवर्णरत्नित्रेणोद्धृत्य
रथमारोप्यतत्रछायेपर्यंतदेशेवृक्षमूलेअगाधजलहृदेवावामदेवेननिक्षि
पेत्॥प्रतिमांतुप्रणवेननिक्षिपेत्॥दारुजंचेत्तदुत्तरेदहेत्॥रत्नजंलिंगंयदिनिज

कोत्तिमदेवभवतितदातदेवपूर्ववत्स्थापयेत्॥सुवर्णादिमयं तदेवसांगंकृत्वा
स्थापयेत्॥प्रासादेत्वयंविशेषः॥प्रासादमंत्रानखड्गेछुरिकायांवासंयोज्यनूत
नप्रासादसिद्धिपर्यंतंखड्गादिकमर्चयि त्वाप्रासादेसिद्धेखड्गादिमंत्रान्यथास्था
नंप्रतिष्ठाकालेन्यस्ययजमानमभिषिंचेत्॥ततोयल्लिंगंप्रतिमांवातत्रैवविधि
वत्संस्थाप्यध्रुवाद्यौर्ध्रुवापृथिवीध्रुवासःपर्वतादमे॥ध्रुवंविश्वमिदंजगद्ध्रुवो
राजाविशामयं॥ध्रुवंतेराजावरुणोध्रुवं देवोबृहस्पतिः॥ध्रुवंतइंद्रश्चाग्निश्च
ष्टंधारयतांध्रुवं॥ध्रुवंध्रुवेणहविषाभिसोमंमशीयसि॥अथोतइंद्रःकेवलीर्वि

ओंबलिहृतस्करदितिमंत्रान्पठित्वास्थिरीकरसबहुसपूज्यप्रार्थयेत्॥ज्ञानतो
ज्ञानतोवापियथोक्तंनकृतंयदि॥तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादान्महेश्व
र॥कर्तुराज्ञःप्रजानांचशांतिर्भवतुसर्वदा॥अस्माकंशिल्पिनांचैवसुप्रीतोभव
सर्वदेति॥ ॥इतिश्रीमन्मीमांसकशंकरभट्टात्मजनीलकंठकृतेभास्करेप्र
तिष्ठामयूखोष्टमःसमाप्तः॥ ॥अर्जितंभूरिकष्टेनपुस्तकंलिखितंमया॥इ
तुमिछतियःपापीतस्यवंशक्षयोभवेत्॥ ॥संवत१८५७प्रजापतिसंवत्स
रेशाके१७२२रौद्रसंवत्सरेमार्गशीर्षमासः॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

1028

॥इतिप्रतिष्ठामयूरवः समाप्तः॥

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL ASIATIC SOCIETY